चत्वारः द्वित्वप्रबन्धाः

CHATVARAH DVITVAPRABANDHAH

श्रीऐजीवेङ्कटरामाचार्यादिकर्तृकाः

BRINDAVANAM OFFICE

SRI RAGHAVENDRA SWAMIGAL MUTT

MANTRALAYAM, Kurnool District (A.P.)

चत्वारः

द्वित्वप्रबन्धाः

CHATVARAH

DVITVAPRABANDHAH

श्रीऐजीवेङ्कटरामाचार्यादिकर्तृकाः

BRINDAVANAM OFFICE

SRI RAGHAVENDRA SWAMIGALA MUTT

MANTRALAYAM, Kurnool District(A.P.)

CHATVARAH DVITVAPRABANDHAH

A collection of Four Works written by different authors regarding the nature of the attribute DVITVA.

Published by:
Brindavanam Office
Mantralayam-518 345.

Pages: 70 + xv


First Edition : 1993

Copies:1000

Edited by:
Sri P.S. Seshagiri Rao
8, Swimming pool Road,
Saraswatipuram, Mysore-570009


Printed by:
C.M.Nagendra rao
Laxmi Printers&Publishers,
99-101. Gandhi Bazaar Main road,
Bangalore -560004
Phone : 607595.

श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमाः



श्रीमतो राघवेन्द्रस्य नमामि पदपङ्कजे ।
कामिताशेषकल्याणकलनाकल्पपादपौ ॥

श्रीव्यासतत्त्वज्ञतीर्थाः



प्रकटीकृतटीकोक्तिर्मर्कटीकृतमायिराट् ।
चर्कृताद् व्यासतत्वज्ञमस्करीन्द्रः कृपां मयि ॥

श्रीमत्सुजयीन्द्रतीर्थश्रीमच्चरणाः



सुयमीन्द्रकराब्जोत्थं सुविद्याबोधकं सदा ।
सुमूलरामपूजाढ्यं सुजयीन्द्रगुरुं भजे ॥

श्रीमद्धंसनामकपरमात्मारब्धपरम्परागत-
श्रीमदानन्दतीर्थभगवत्पादाचार्यमूलमहासंस्थानाधीश्वराणां,
श्रीमद्राघवेन्द्रगुरुसार्वभौमवेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां,
श्रीमत्परमहंसपरिव्राजकेत्याद्यमन्दबिरुदवृन्दविभूषितानां
श्रीमत्सुयमीन्द्रतीर्थश्रीपादकरकमलसञ्जातश्रीमत्सुजयीन्द्रतीर्थ-
श्रीपादवरकुमारकाणां

श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादानाम्

अनुग्रहवचनम्

अस्मत्सिद्धान्ते द्वित्वादिधर्मस्वरूपमधिकृत्य विचारः श्रीमन्न्याय-सुधादिग्रन्थेषु निरूपितः। यद्यप्याकरग्रन्थेषु तत्र कापि विप्रतिपत्तिसूचना नास्ति। वैकल्पिकं पक्षत्रयमेव निरूपितमस्ति तथापि आर्याचार्यशिष्यप्रशिष्य-कोटिप्रविष्टः केचन विद्वांसः श्रीमन्न्यायसुधायां द्वित्वादिधर्मस्वरूपमधिकृत्य निरूपितः सर्वोऽपि विषयोऽभ्युपगमवादेन प्रवृत्तः वस्तुस्थितिस्तु अन्यप्रकारैवेत्यार्याचार्याणा- मभिप्राय इत्युक्त्वा विप्रतिपत्तिं प्राकटयन्। चमत्कारपारावारन्याय- सुधोक्तीनामेतादृशतिरस्कारमसहमानैः न्यायसुधायां बद्धादरैरस्मन्मठपूर्वाचार्यैः तुर्याश्रमस्वीकारानन्तरं **श्रीव्यासतत्वज्ञतीर्था** इति सुगृहीतनामधेयैः नैकग्रन्थनिर्मातृभिर्विश्रुतवैदुष्यैः **श्री ऐजी वेङ्कटरामाचार्यैः** तेषां विचारप्रणालीं निराकर्तुं द्वित्ववादार्थ इति कश्चन ग्रन्थो निरमायि। विदुषां कृते सोऽयं ग्रन्थः संशोध्य प्रकाशनीय इत्यस्मदभिप्राय आसीत्। परं केवलं तेषामेव ग्रन्थस्यैकस्य प्रकाशे तत्प्रतिपक्षभूता विषयाः

सम्यङ् न ज्ञायन्त इति मनीषया आर्याचार्यसम्प्रदायागतानामपि ग्रन्थाः प्राकाश्यं नेया इति निश्चित्यायमुद्यमः कृतः।

तत्रास्मन्मठशिष्या **श्रीफलिमारु-भण्डारकेरिमठाधीशानां श्रीविद्यामान्यतीर्थश्रीमच्चरणानां तथा श्रीपेजावराधोक्षजमठाध्यक्षाणां श्रीविश्वेशतीर्थश्रीमच्चरणानामन्तेवसन्तः** श्री शेषगिरिराया ग्रन्थानामेषां संशोध्य सम्पादने अस्माभिरादिश्यन्त। तेऽप्यल्पीयसैव कालेन सपरिश्रमं चेदं कार्यं समापितवन्तः। अतस्तेभ्यः श्रीमद्राघवेन्द्रतीर्थहृन्मण्टपस्थो श्रीमुख्यप्राणान्तर्यामी श्रीमन्मूलरामचन्द्रोऽस्मदुपास्यः श्रेयांसि भूयांसि वितरत्वित्याशास्महे।

मन्त्रालयक्षेत्रम् इत्यनेकनारायणस्मरणानि
श्रीमुखसंवत्सरस्य बलिप्रतिपत्

सम्पादकीयम्

द्वित्वस्वरूपमधिकृत्यास्मदीयेषु प्राचीनग्रन्थेषु विद्वत्सु च विप्रतिपत्तिर्बहोः कालादपि वर्तते । तत्र द्वित्वस्वरूपे मतद्वयम् । द्वित्वादिसंख्या व्यासज्यवर्तिनीत्येकः पक्षः । प्रातिस्विकीति द्वितीयः । तत्र व्यासज्यवृत्तित्ववादिनः स्वाभिमतप्रमेयस्थापनाय वैशेषिकाधिकरणसुधावाक्यादिकमवलम्बन्ते। प्रातिस्विकत्ववादिनस्तु "भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि" इति प्रमाणे स्वधुरां विन्यस्य विवदन्ते।

सामान्यतो व्यासज्यवृत्तित्वमित्युक्तपक्षेऽपि वैकल्पिकं पक्षत्रयं वर्तते । द्वित्वादिकं नानैकत्वसमाहाररूपमित्येकः । अस्मिन् पक्षे व्यासज्यवृत्तीति नोच्यते। एकत्वातिरिक्तद्वित्वादिसंख्याया एवानङ्गीकारात्। एतत्पक्षाश्रयणेऽपि 'एकत्वाभावेऽनेकत्वमपि न स्यात्। तत्समाहाररूपत्वात् तत्कार्यत्वाद्वा तस्य' इति सुधावाक्यमेव मानम्। प्रातिस्विकत्ववादिभिरेतत्पक्षे दोषद्वयमुद्भाव्यते। द्वित्वादीनामनेकैकत्वसमाहाररूपत्वे द्वित्वत्रित्वादीनां वैलक्षण्यं न स्यादित्येकः। दशैव मूलसंख्या तु तद्विभेदाः शतादयः इत्यैतरेयभाष्योदाहृतप्रमाणविरोधश्चापरः । तत्राद्यदोषविषय एवं सुवचम् । प्रातिस्विकत्ववादिभिरपि द्वित्वत्रित्वयोर्वैलक्षण्यं वक्तव्यमेव। कारणवैलक्षण्यप्रयुक्तत्वरूपं वा अन्यदेव वा। ततश्चान्योन्याश्रयादिदोषविधुरतया यद् वैलक्षण्यं निरुच्यते तदेव समाहारवादिभिरपि वक्तुं शक्यत एवेति। द्वितीयदोषविषये इदं वक्तव्यं भवति। सुधायां पक्षत्रयमुपन्यस्तम् । तदेतत् पक्षत्रयं परस्परविरुद्धम् । अतो ज्ञायते वैकल्पिकमिति । ततश्च अपेक्षाबुद्धिजन्यत्वरूपद्वितीयपक्षे तद्व्यङ्ग्यत्वरूपतृतीयपक्षे चैवास्य वचनस्य प्रवृत्तिः, न समाहारपक्ष इति न तद्विरोध इति।

प्राधान्येन विस्तरेण च प्रतिपादितः पक्षो द्वितीय एव । द्वित्वादिकमपेक्षाबुद्धिजन्यमयावद्द्रव्यभावि भिन्नाभिन्नं व्यासज्यवृत्तीति। तथा

हि वैशेषिकाधिकरणसुधावाक्यसन्दर्भः-

"नन्वनेकत्वसंख्या तावदनेकाश्रिता । एकस्मिन् द्वित्वादेः शङ्कितुमप्यशक्यत्वात् । न हि द्वित्वादिकमेकैकप्रतीतौ प्रतीयते । न च प्रतियोगिनिरूप्यम् । धर्मितयैवानेकेषामनुभवात् । अतो धर्मत्वहेतोस्तत्रानैकान्त्यमित्यत आह- **समुदायस्त्विति** । समुदायोऽनेकत्वम् । भिन्नगोऽनेकाश्रितः । सत्यमनेकत्वसंख्याऽनेकाश्रिता । तथापि तदन्यत्वेन हेतुविशेषणाददोष इति भावः । सा चापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः" इति ।

प्रातिस्विकत्ववादिभिस्तु अपेक्षाबुद्धिजन्यत्वं वा अयावद्द्रव्यभावित्वं वा भेदाभेदोऽपि वा नाङ्गीक्रियते यावद्द्रव्यभावित्वमभेदः प्रातिस्विकत्वं चाङ्गीक्रियते । ततश्च तैरस्मिन्पक्षे एवं दोष उद्भाव्यते । द्वित्वादीनामपेक्षाबुद्धिजन्यत्वे घटेश्वरद्वित्वं प्रति ईश्वरस्याप्यवश्यमुपादानत्वस्वीकारस्यापरिहार्यत्वादीश्वरस्य विकारित्वप्रसङ्गः, ततश्च निर्विकारत्वश्रुतिव्याकोप इति। अयमेव प्रधानो दोष उद्भावितेष्वशेषदोषेषु । व्यासज्यवृत्तित्ववादिभिरत्रापि विषये एवं चिन्तितम् । पराधीनविशेषावाप्तिरूपस्य द्रव्यान्तरत्वापत्तिरूपस्य वा विकारस्य दोषत्वम् । नास्य विकारस्य तयोरन्यतरत्वम् । यथा घटेश्वरसंयोगः । स हि संयोग उत्पत्तिविनाशशाली ईश्वरनिष्ठ ईश्वरोपादानक अङ्गीकार्यः । न तावतेश्वरस्य विकारित्वप्रसङ्गः । तथाह्यत्र श्रीजयतीर्थश्रीव्यासतीर्थश्रीविजयीन्द्रतीर्थश्रीमच्चरणानां श्रीपाण्डुरङ्गी केशवाचार्याणां च सम्मतिः-

"न च निरवयवं क्वापि परिणतं दृष्टम् । आकाशं संयोगादिमदुपलब्धमिति चेन्न । द्रव्याकारपरिणामस्य प्रकृतत्वात्" - इति सुधायाम् ।

'आकाशस्य संयोगाश्रयत्व इवात्मनो ज्ञानरूपगुणश्रयत्वेऽपि द्रव्यान्तरत्वापत्तिरूप विकारानापातात्" - इति न्यायामृते कर्तृत्वाध्यासभङ्गे ।

"न वा लाधवात् कार्यमात्रं विकारः । तथात्वे मृद् घटाद्यात्मना विकरोतीतिवत् दण्डसंयोगादिमिति पुरुषे पुरुषः संयोगाद्यात्मना विकरोतीति प्रतीतिप्रसङ्गादिति भावः" इति तत्रैवामोदे श्रीविजयीन्द्रतीर्थश्रीमच्चरणैः ।

"अनेकत्वसंख्ययेव अयावद्द्रव्यभाविविशेषणविशिष्टाकारेणापीश्वरस्य भेदाभेदावेवाभिमतौ, समुदायमृत इत्यत्र विशिष्टाकारस्याप्यभिमतत्वादिति बहवः"- इति श्रीपाण्डुरङ्गीकेशवाचार्यैः सा चापेक्षाबुद्धिजन्येत्यादि-सुधावाक्यविवरणावसरे शेषवाक्यार्थचन्द्रिकायाम् ।

अतो नायं विकारो दोषावह इति व्यासज्यवृत्तित्ववादिनामाशयः ।

अपि चैवमपि विकल्पितं प्रातिस्विकत्ववादिभिः । ईश्वरेऽङ्गीक्रियमाणस्तादृशो विकारो जडं चेतनं वा । जडत्वे ईश्वरस्य स्वरूपे जडप्रवेशापत्तिः । चेतनत्वे ईश्वराभेदावश्यंभावात् अपेक्षाबुद्ध्यादिनाशेन द्वित्वादिनाशायोग इति । तत्रेदमपि विचारणीयं भवति । बृहदारण्यकभाष्ये "भेदाभेदस्तु बद्धानां गुणैः स्वैः कर्मभिस्तथा", "चिन्तनादिक्रियाणां तु मुक्तावुच्छेदतः सदा । किं मया कार्यमादीनां भेदाभेद उदीरितः" इति ब्रह्मतर्कवचनमुपन्यस्य संसारावस्थायां विद्यमानानां किं मया कार्यमित्यादिचिन्तादीनां भेदाभेद उक्तः । तत्राप्ययं विकल्पः प्रसरति । किमियं चिन्ता जडा चेतना वा ,जडत्वे जीवस्वरूपे जडप्रवेशः, भेदाभेदस्वीकारेणाभेदांशसत्वात्, चेतनत्वे चिन्ताया नाशायोग इति । ततश्चात्र यः समाधिः स एवेश्वरविषयेऽपि समाधिर्भवतीति ।

द्वित्वादेरीश्वरेण भेदाभेदोपि दूषितः प्रातिस्विकत्ववादिभिः । "भेदाभेदेप्यभेदेन दोषाणामपि सम्भवः" इत्यनुव्याख्यानोक्तदिशा द्वित्वाद्युत्पत्तिनाशाभ्यामीश्वरस्याप्युत्पत्तिनाशापत्तिरिति । अत्रापि विचारणीयं वर्तते । "उपादानेन तु द्वयम् " इत्यनुव्याख्यनोक्तदिशा मृद्घटयोर्भेदाभेदो वर्तते । न

तावता घटस्योत्पत्तिनाशादिना मृदोऽप्युत्पत्तिनाशादि । अदर्शनात् । अत
भेदाभेदेऽपीत्याद्यनुभाष्यवाक्यस्यान्य एवार्थः योऽतिप्रसङ्गानापादकः।

अपेक्षाबुद्धिव्यङ्ग्यं व्यासज्यवृत्ति भिन्नाभिन्नमिति तृतीयः पक्षः। बहुत्रा
पेक्षाबुद्धिजन्यत्वस्यैव सुधादावुक्तेरयमभ्युपगमवाद इति व्यासज्यवृत्तित्व
वादिष्वेव केचन । अपरे तु तर्कताण्डवे ईश्वरवादे "कि
द्वित्वादेरपेक्षाबुद्धिजन्यतैव न । अन्वयव्यतिरेकानुविधानस्य व्यञ्जकत्वेना
प्युपपत्तेः । न चाविनिगमः । सेनादिबुद्ध्यालम्बनस्येयत्तया
ऽनिश्चितानैकैकत्वबुद्धिजन्यस्य बहुत्वस्य सत्त्वेऽपीयत्तया विनिश्चितैकत्व
बुद्धिरूपव्यञ्जकाभावेन शतत्वाद्यप्रतीत्या व्यञ्जकत्वस्य त्वयापि स्वीकारात्
इत्युक्तत्वात्, तत्रैव न्यायदीपे श्रीराघवेन्द्रतीर्थैः- "द्वित्वादेरपेक्षाबुद्धि
जन्यत्वमभ्युपेत्योक्तम् । वस्तुतस्तदेव नास्ति येन तदाश्रयतयेश्वरसिद्धि
स्यादित्याह-किञ्चेति ।" "इत्युक्तत्वाच्चायमेव मुख्यः पक्ष इत्यभिप्रयन्ति
व्याङ्ग्यत्वेपि द्वित्वादीनां धर्मिणा भेदाभेद एव । "न केनचिदभेदोऽस्ति
भेदाभेदोऽपि वा क्वचित्। समुदायमृते विष्णोः स्वगुणादीन् विनापि वा" इ
विशेषशास्त्रबलात् । भिन्नाश्च भिन्नधर्माश्चेति तु समान्यशास्त्रं विशेषशास्त्रे
बाध्यते । यद्यपि "भेदाभेदो न तु क्वापि विष्णोरस्ति कदाचन" इ
ब्रह्मतर्कवचनमप्युदाहृतं बृहद्भाष्ये। तथाप्यस्य वचनस्य सङ्कोच आवश्यक इ
व्यसज्यवृत्तित्ववादिनः। न च व्यङ्ग्यत्वेन द्वित्वादेर्यावद्द्रव्यभावित्वे "खण्डि
भेद ऐक्यं च यावद्वस्तु न भेदवत्" इत्युक्तदिशा धर्म्यभेदापत्तिः। अस्य न्याय
"कार्यकारणयोश्चैव" इत्यादिना नियतस्थलत्वात् । अस्य च स्थल
नियमबहिर्भावात् । यद्यपि जन्यत्वपक्षे द्वितीये कार्यकारणभावोऽस्ति
कार्यमुपादेयं कारणमुपादानमिति तत्रैव टीकोक्तेः। तथाप्ययमुत्सर्गन्याय इ
व्यासज्यवृत्तिवादिनामभिप्रायः। कार्यकारणयोश्चैवेत्यस्यान्यत्रावकाशो वर्त
समुदायमृत इत्यस्यान्यत्रावकाश एव नास्तीति हेतोः।

प्रातिस्विकत्ववादिनस्तु द्वित्वादेर्यावद्द्रव्यभावित्वं धर्म्यभेदं प्रत्येकविश्रान्तिं चाभ्युपगच्छन्ति ।तथा हि

"संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक्।
तथा द्वित्वादयो धर्मा न हि व्यासज्यवर्तिनः।

इति सत्तत्वरत्नमालायाम्।

तत्र द्वित्वादेः प्रत्येकं विश्रान्त्यभ्युपगमे "एकस्मिन् द्वित्वादेः शङ्कितुमप्यशक्यत्वात्" इति सुधाविरोधः स्फुट एव । संयोगसमानयोगक्षेमत्वाङ्गीकारेऽपि "न च प्रतियोगिनिरूप्यम्" इति सुधाविरोधः स्पष्ट एव। तद्व्याख्यातृभिः सर्वैः संयोगवैधर्म्यस्यैवोपपादनात्।

तथा हि शेषवाक्यार्थचन्द्रिकायाम्-

"तथापि समुदायस्तु भिन्नग "इत्यनेकत्वसंख्याया अनेकाश्रितत्ववर्णनमनर्थकमित्याशङ्क्यानेकत्वसंख्यायामुक्तहेतोर्व्यभिचारपरिहारार्थत्वान्न तदिति भावेन तच्छंकापरिहारकतया तद् योजियितुं तच्छङ्कामुत्थापयति – नन्विति। शङ्कितुमप्यशक्यत्वादित्युक्तम्। तत् कुत इत्यतो बाधकसत्त्वादित्याह–न हीति। एकैकवृत्तित्वे एकैकप्रतीतावेव प्रतीयेत, न च तथा प्रतीयते, तस्मान्न तस्यैकवृत्तित्वमिति भावः । एकैकवृत्तित्वेऽपि संयोगादिवत् प्रतियोगिनिरूप्यत्वमात्रेण एकप्रतीतावेव प्रतीत्याभावः किं न स्यादित्यत आह **न चेति** ।

यद्वा द्वित्वादेरेकैकवृत्तित्वसाधकतया भवदभिमतयुक्तिद्वयस्याप्यत्रासम्भवादित्याशयवान् किं तस्य सामान्यादिवदेकैकप्रतीतावेव प्रतीयमानतया एकैकवृत्तित्वमभिप्रेतं किं वा संयोगादिवदन्योन्यप्रतियोगिकत्वादिति विकल्पद्वयं मनसि निधायाद्यं निराचष्टे – न हीति। धर्मत्वं च गहननिविष्टत्वान्न

तत्साधकमिति भावः । द्वितीयं निराचष्टे - न चेति । तत् कुत इत्यत आह-धर्मितयैवेति । न तु प्रतियोगितयेत्यर्थः''इति

तथा तत्रैव परिमळे- "ननु एकप्रतीतावप्रतीयमानद्वित्वादिकं संयोगादिवदेकैकाश्रितमस्तु इत्यत आह-न च प्रतियोगिनिरूप्यमिति "। इति

तथा तत्रैव यादुपत्येऽपि-''न च प्रतियोगिनिरूप्यमिति । तथा च संयोगादिवदपि नैकमात्राश्रितमिति भावः'' इति

एवं चषकेऽपि-''प्रतियोगिनिरूप्यं प्रतियोगिप्रतिपत्त्यधीनप्रतिपत्तिकम्'' इति ।

अत एतद्विरोधपरिहारार्थं प्रातिस्विकत्ववादिनः सुधा अभ्युपगमवादेन प्रवृत्तेति वदन्ति । तत्र सुधायामभ्युपगमवाद एव नास्तीति न । परं तत्र व्याख्यातृभिरभियुक्तैरभ्युपगमवादोऽयमित्युच्यते । यथा ''उपसर्गा हि धात्वर्थलीनमर्थं गमयन्ति'' इति सुधाव्याख्यानावसरे परिमले''अभ्युपेत्य चेदमुदितम् । स्वमते उपसर्गाणां वाचकत्वात्''इति ।

यथा वा अनुव्याख्यान एव प्रकृत्यधिकरणे''यो भागो न विकारी स्यात् स एवास्माकमीश्वरः'' इत्यत्र सुधायां ''अत्र यो भाग इति पराभ्युपगमेनोक्तम् । स्वमतेन तु यद्वस्त्विति ज्ञातव्यम्''इति

परं कैरपि व्याख्यातृभिरभ्युपगमवादत्वेनानुक्तस्य तथात्वस्वीकरोऽयुक्त इति व्यासज्यवृत्तित्ववादिनामाशयः । न केवलमभ्युपगमवाद इति नोक्तमित्येतावत् । अपि त्वभियुक्तैरपि प्रसङ्गादन्यत्राप्येवमेव विषयो निरूपितः। यथा श्रीविजयीन्द्रतीर्थश्रीमच्चरणैः न्यायामृतामोदे मिथ्यात्वनिरुक्तिभङ्गे-

''केचित्तु विश्वत्वस्यापेक्षाबुद्धिविशेषविषयत्वरूपस्य द्वित्वादिवद्

व्यासज्यवृत्तितया विश्वपदार्थैकदेशभूते घटादिमात्रे पर्याप्त्यभावाद् विश्वं मिथ्येत्येव प्रतिज्ञायामपि न तदैकदेशे मिथ्यात्वरूपसाध्यसिद्धिमादाय प्रतिज्ञापर्यवसानं किन्तु तत्पर्याप्त्यधिकरण एव । तथा चैवकारस्य प्रयोजनान्तरमन्वेषणीयमिति वदन्ति । तन्न । तादृशविश्वत्वस्य ब्रह्मण्यपि सत्वेन तदंशे प्रतिज्ञावाक्यस्य बाधितत्वप्रसक्तौ तत्परिहाराय तद्व्यतिरिक्तस्य विश्वपदार्थस्य पक्षत्वमिति संकोचस्यावश्यकत्वे-----इत्यादि

तथा वृत्तिव्याप्यत्वभङ्गेऽपि- ''विषयत्वस्य द्वित्वादिवदेकैकत्र पर्याप्त्यभावेऽपि विशेष्यवृत्तित्वानपायात्'' इति ।

नह्येकेनैकत्राभ्युपगमवादाश्रयणे अन्यैरपि अन्यत्रापि निर्निमित्तं स एवाश्रयणीय इति नियमोऽस्तीति व्यासज्यवृत्तित्ववादिनामाशयः ।

अपि चास्मिन् पक्षे एकप्रत्यक्षेऽपि द्वित्वप्रत्यक्षापत्तिः प्रतियोगिप्रत्यक्षस्य कारणत्वं स्वीकृत्य द्वित्वस्य सप्रतियोगिकत्वं च स्वीकृत्य निवारिता । तदेतत् ''न च प्रतियोगिनिरूप्यम्'' इति सुधाविरुद्धम् । तथा तद्व्याख्यातृणां सर्वेषां वचनविरुद्धमपि ।

''घटः पटाद् द्वितीयः'' इति प्रतीतिमालम्ब्य द्वित्वस्य सप्रतियोगिकत्वमभ्युपेयमिति तेषामेव केषाञ्चनाशयः । तत्र द्वितीयशब्दस्य अपकर्षाश्रयगुणाश्रयत्वाद्यर्थकत्वे द्वितीयत्वस्यैव सप्रतियोगिकत्वम् । तादृशार्थे द्वितीयशब्दस्य रूढिरेव लक्षणा वा । न त्विदं द्वितीयत्वं द्वित्वगर्भमूर्ति । येन तादृशप्रयोगेण द्वित्वस्य सप्रतियोगिकत्वं सिद्ध्येत् । द्वितीयशब्दस्य द्वित्वसंख्यापूरकत्वार्थकत्वे तादृशप्रयोग एव विप्रतिपत्तिर्वर्तते । तादृशप्रयोगस्य सम्प्रतिपन्नत्वे प्रयोगसाधुत्वार्थं व्युत्पत्तिवैचित्र्यमवलम्ब्य पञ्चम्या अन्यार्थ एव वर्णनीयो न तु प्रतियोगित्वम् । सुधाविरोधात् । अन्यथा रामो लक्ष्मणाद् द्वितीय इति घटः पटाद् द्वौ इति प्रयोगश्च स्यात् । बाधकाभावात् । इति

व्यासज्यवृत्तित्ववादिनामभिप्रायः।

अपि च द्वित्वादेर्यावद्द्रव्यभावित्वप्रातिस्विकत्वपक्षे अपेक्षाबुद्ध्यन्वय-व्यतिरेकानुविधानस्य का गतिरिति तैः प्रायो न विचारितमित्यपि मनःखेदमावहति।

तदेवमुभयवादिरीत्या विषयो निवेदितः। सन्तः परीक्ष्यान्यतरं साधुपक्षं भजन्त्विति सम्प्रार्थ्य, अत्र लेखने सम्भवत्स्खालित्यमपि क्षन्तव्यमिति सप्रश्रयं निवेद्य विरम्यते।

द्वित्वस्वरूपविमर्शात्मकग्रन्थाः

द्वित्वस्वरूपे विप्रतिपत्तिः प्राग् दर्शिता। तत्र द्वयोरपि पक्षयोर्बहवो ग्रन्था वर्तन्ते। प्रातिस्विकत्ववादिनां मूर्धन्याः श्रीमुष्णनरसिंहाचार्याः। आर्याचार्या इत्यपि एतेषां नाम। एते आर्याचार्यवंशमूलपुरुषाः। ततः परमेतेषां वंशे आर्याचार्यनामानो विद्वांसः नेके वर्तन्ते। एते श्रीरघूत्तमस्वामिनां (1557-1596 AD) समानकालीना इति ज्ञायते। एतेषां संन्यासिशिष्या अपि बहव आसन्निति श्रूयते। एतेषां शिष्येषु प्रवरौ द्वौ ताम्रपर्णीयवंशमूलपुरुषाः श्रीनारायणाचार्याः तथा श्रीश्रीमुष्णवासुदेवाचार्याश्च। ताम्रपर्णीवंशस्तु श्रीवत्सभारद्वाजात्रेयसगोत्रस्रोतस्त्रयरूपेण प्रवहति। अस्मिन् वंशे ... श्रीमुष्णवासुदेवाचार्याणां वंशेऽपि बहवो विद्वांस आसन्। ताम्रपर्णीवंशे त्विदानीमपि चतुरस्त्रविद्यासम्पन्ना वर्तन्त इति प्रमोदास्पदमिदम्। एते सर्वेऽपि नियमेन द्वित्वादिसंख्यानां प्रातिस्विकत्ववादिनः। व्यासज्यवृत्तित्ववादिनोऽपि श्रीविद्याधीशतीर्थश्रीमच्चरणानां (1619-1636 AD) कालतोऽपि वर्तन्ते। पक्षद्वयेऽपि बहवो ग्रन्था आसन्निति इदानीं विद्यमानग्रन्थपरिशीलनया ज्ञायते। प्रायेण बहवो ग्रन्था उत्सन्नाः। केचिदेवोर्वरिताः। तत्रापि केचन जीर्णप्राया अनुपयुक्ता वर्तन्ते। दृष्टश्रुतग्रन्थानामयमधस्तादीषन्निर्देशः।

१. **द्वित्ववादार्थः श्रीविद्याधीशतीर्थकृतः**। अस्य ग्रन्थस्य उल्लेखो विद्यमानग्रन्थेषु वर्तते परं नोपलब्धोऽयं ग्रन्थ एतावत्पर्यन्तम्। अतो विषयेऽस्मिन् एषां भावो दुरवबोधः। तथाप्येषां भ्रातृभिः शेषवाक्यार्थचन्द्रिकाकृद्भिः श्रीपाण्डुरङ्गीकेशवाचार्यमहोदयैः व्यासज्यवृत्तित्वपक्षस्यावलम्बनादेतेषां पक्षोऽपि स एवेति निश्चीयते।

तथाहि 'स चापेक्षाबुद्धिजन्या' इत्यादि वैशेषिकाधिकरणसुधावाक्य-व्याख्यानावसरे शेषवाक्यार्थचन्द्रिका–

"एवं तर्हि व्यभिचाराभावेऽप्यनेकत्वसंख्याया आश्रयाभेदादाश्रयाणाम-भेदप्रसङ्गोऽनेकत्वसंख्याया वा भेदप्रसङ्ग इति प्रागुक्तदोषं प्रसङ्गात् परिहरति **सा चेति**। नाश्रययोरभेदापत्तिरित्युपलक्षणम्। नानेकत्वसंख्याया भेदापत्तिरित्यपि द्रष्टव्यम्। अनेकत्वसंख्ययेवायावद्द्रव्यभाविविशेषण-विशिष्टाकारेणापीश्वरस्य भेदाभेदावेवाभिमतौ, समुदायमृत इत्यत्र विशिष्टाकारस्याप्यभिमतत्वादिति बहवः" इति।

अत्र नानेकत्वसंख्याया भेदापत्तिरित्यनेन द्वित्वादीनां व्यासज्यवृत्तित्वं सिद्धम्। अनेकत्वसंख्ययेवानित्यविशिष्टाकारेणापीश्वरस्य भेदाभेदावेवाभि-मतावित्यनेनेश्वरस्य तादृशविशिष्टाकाराङ्गीकारेऽपि न निर्विकारत्वश्रुतिविरोध इत्यपि तेषामाशय इति सिद्धम्। बहव इत्युक्त्या अस्या विप्रतिपत्तेस्तदानीमपि सद्भावः ग्रन्थकर्तुर्व्यासज्यवृत्तित्वपक्षपातश्च सिद्ध्यति।

अतो श्रीविद्याधीशतीर्था व्यासज्यवृत्तित्ववादिन इति सिद्ध्यति।

२. **द्वित्वविचारः श्रीमुष्णवासुदेवाचार्यशिष्यवासुदेवाचार्यकृतः**। श्री के.टि.पाण्डुरङ्गीमहोदयानां सङ्ग्रहे वर्तते। एते प्रातिस्विकत्ववादिनः। ग्रन्थोपसंहारे "तस्माद् द्वित्वादिभिः सर्वैर्ज्ञानानन्दादिभिस्तथा। अभिन्नो भगवान्

दोषाभावरूपगुणैरपि'' इत्युक्तम् । द्वित्वादिविषये विप्रतिपत्तिस्तिष्ठतु । दोषाभावरूपगुणेनाप्यभेदे सुधाविरोधो भवति । तथा ह्यदृश्यत्वाधिकरण अगोत्रमित्यादिश्रुत्यर्थविचारावसरे सुधा-

''ननु तर्हि ब्रह्मण्यपि तथात्वप्रसङ्गः । सत्यम् । गोत्रादिसंसर्गाभावस्य ब्रह्मातिरिक्तत्वाभ्युपगमात् । यथा हि दण्डो देवदत्तस्य विशेषणं तथा गोत्राद्य-भावोऽपि ब्रह्मणो विशेषणम्''इति । अयं ग्रन्थोऽत्र मुद्रितः ।

३. **द्वित्ववादार्थः । ऐजी वेङ्कटरामाचार्यकृतः** (1704-1800 A.D) एत एव श्रीव्यासतत्वज्ञतीर्थश्रीमच्चरणाः (1785-1800 A.D) अयं ग्रन्थः तैः पूर्वाश्रमे विरचितः । प्रागुदाहृतस्य द्वित्वविचारनामकग्रन्थस्य खण्डनरूपोऽयं ग्रन्थः । अत्र 'द्वित्वविचारः' तत्र तत्रानूद्य निराक्रियते । अयमत्र मुद्रितः ।

४. **द्वित्ववादः । ऐजीवेङ्कटरामाचार्यसुतगोपालकृष्णचार्यविरचितः** । अस्योल्लेखः श्रीमद्विष्णुतत्वविनिर्णयटीकाव्याख्याने लघुप्रभायां श्रीव्यासतत्वज्ञतीर्थविरचितायां वर्तते । परमेतावता नोपलब्धः ।

५. **द्वित्ववादार्थमञ्जरी श्रीमुष्णाचार्यविरचिता** । अयं ग्रन्थ उत्तरादिमठीयपुस्तकागारे वर्तते इति ज्ञायते ।

६. **द्वित्ववादार्थमञ्जरी आर्याचार्यशिष्यविरचिता** । आर्याचा... तच्छिष्यवंशे चानेके आर्याचार्यनामानःसन्ति । तेषामन्यतमशिष्यविरचितोयं ग्रन्थः स्यात् । अयमपि उत्तरादिमठीयपुस्तकागारे वर्तते इति श्रूयते ।

७. **द्वित्ववादार्थः गोपालकृष्णाचार्यकृतः** । अयं ग्रन्थ मैसूरुनगरे प्राच्यवस्तुसंशोधनागारे वर्तत इति ग्रन्थसूचिषु ज्ञायते ।

८. **द्वित्वविचारः अप्पण्णाचार्यकृतः** । अयमपि ग्रन्थ उत्तरादिमठीय-

पुस्तकागारे वर्तत इति श्रूयते ।

९. **भगवद्द्वित्वमीमांसा अप्पय्याचार्यकृता** । अयमपि ग्रन्थः मैसूरुनगरे प्राच्यवस्तुसंशोधनागारे वर्तत इति ज्ञायते ।

१०. **द्वित्वविचारः ताम्रपर्णी श्रीनिवासाचार्यकृतः** । अयमपि मैसूरुनगरे प्राच्यवस्तुसंशोधनागारे वर्तत इति ज्ञायते ।

११. **द्वित्वमीमांसा आयी आचार्यकृता** । अयं ग्रन्थः प्रभञ्जनाचार्याणां सङ्ग्रहे वर्तते ।

१२. **द्वित्वमीमांसा श्यामाचार्यसूनुगोपालकृष्णचार्यविरचिता** । अयं ग्रन्थ उत्तरादिमठीयपुस्तकागारे वर्तत इति श्रूयते ।

१३. **द्वित्वमीमांसा आर्याचार्यसम्प्रदायानुयायि गोपालकृष्णचार्य-विरचिता** । अयमत्र मुद्रितो वर्तते ।

१४. **द्वित्वचिन्तामणिः श्रीमुष्णवासुदेवाचार्यदौहित्रगोपाल-कृष्णाचार्यविरचितः** । अयमत्र मुद्रितोऽस्ति ।

१५. **भीमभूतभ्रमोच्चाटनम् आनन्दतीर्थचार्यकृतोऽयं ग्रन्थो** मैसूरुप्राच्यसंशोधनागारे जीर्णावस्थायां वर्तते । व्यासज्यवृत्तित्ववादिन एतेऽपि । तथा हि तत्रोपसंहारः

''एवं सर्वत्र शङ्कापरिहारयोर्भगवत्तदितरधर्मविषयत्वेनैव प्रवृत्तत्वावगमादिदमपि वाक्यं भगवद्द्वित्वस्यापेक्षाबुद्धिजन्यत्वायावद्द्रव्य-भावित्वभिन्नाभिन्नत्वप्रतिपादनपरमवगम्यत इति तन्नित्यत्वाभिधान-मत्यन्तसाहसमेव । यद्यप्युपासनापादे द्वित्वमपेक्षाबुद्धिजन्यं तद्व्यङ्ग्यं वेति

सुधायामुक्तम् । तथापि व्यंग्यत्वं पररीत्यैवोक्तम् । वैशेषिकपरीक्षायां बहुषु स्थलेषु अपेक्षाबुद्धिजन्यत्वस्य सिद्धान्तितत्वादित्यलमपहसनीय-प्रक्रियानिराक्रियाप्रयासेन इति ।

एते उत्तरकर्णाटकदेशीया इति ग्रन्थारम्भे ज्ञायते ।

१६. **श्रीविश्वप्रियमध्वनाथतीर्थश्रीमच्चरणानां कृतिः** ।(1834-1931 A.D) श्रीताम्रपर्णी (कोयमुत्तूर) शेषगिरीशाचार्याणां सङ्ग्रहे ग्रन्थोऽयं वर्तते । परं तत्र ग्रन्थनाम किमपि न निर्दिष्टम् । ग्रन्थेऽपि लिपिकृत्प्रमादेन तत्र तत्र स्खालित्यमपूर्णता च दृश्यते । तथापि तस्य सार एवं सङ्गृह्यते ।

'द्वित्वादिसंख्या प्रतिव्यक्ति विश्रान्ता, धर्म्यभिन्ना च । अपेक्षाबुद्धि-जन्यत्ववचनादिकं त्वभ्युपगमवादेन प्रवृत्तम् । अन्यथा तस्य व्यासज्यवृत्तित्वे 'भिन्नाश्च भिन्नधर्माश्च' इत्यत्र द्वित्वादिसंख्याव्यतिरिक्ता इत्युच्येत । तथा भगवतस्तद्धर्माणां च भेदाभेददर्शिनामनर्थप्रतिपादकवाक्यसन्दर्भेषु बहुषु द्वित्वादिसंख्याव्यतिरिक्ता एव धर्मा अत्र प्रकृता इति वक्तव्यम् । कुत्रापि तथा नोक्तमतो न भिन्नाभिन्नं द्वित्वादि । यद्यपि ''नित्या धर्मास्तदीयास्तु सर्वेऽस्मा[illegible]व भेदिनः'' इत्यनुभाष्यवचनव्याख्यानावसरे ''द्वित्वादिसंख्याव्यतिरिक्त इति शेषः'' इति सुधावाक्यं वर्तते । तथापि तस्याभिप्रायोऽन्य एव । तत्रापि ''द्वित्वादिव्यतिरिक्ता इति शेषः'' इत्येव सुधापाठो न तु द्वित्वादिसंख्येत्यादि । तत्र द्वित्वशब्दः समुदायार्थकः । समुदायस्तु भगवता भिन्नाभिन्न एव । 'समुदायमृते विष्णोः'इत्युक्तेः । समुदायेन भेदाभेद इत्युक्तेऽपि यत्प्रतियोगिको भेदस्तत्प्रतियोगिक एवाभेद इति नार्थः । विरोधात् । अपि तु समुदायो नाम एकोपाधिकनानापदार्थाः । यथा सेनावनादि । तत्र नानापदार्थ-रूपसमुदायघटकेन स्वेनाभेदः समुदायघटकस्वातिरिक्तेन भेद इत्येव भेदभेदशब्दार्थः । 'अभिन्नो भगवान् स्वेन तदन्येन विभेदवान्' इत्युक्तेः । यथा

पण्डवसेनाघटककृष्णेन कृष्णस्याभेदः तद्घटकार्जुनादिना तु भेद एव । यथा वा वनघटकचूतेन चूतस्याभेदः वनघटकपनसादिना तु भेद एवेति । ततश्च ''समुदायोऽनेकत्वम्''इति सुधावाक्यस्याप्ययमेवाभिप्रायः । अन्यत् सर्वमभ्युपगमवादेन प्रवृत्तिमिति''इति ।

अत्र ''द्वित्वादिव्यतिरिक्ता इति शेषः'' इति वा पाठो भवतु'' द्वित्वादि-संख्याव्यतिरिक्ता इति शेषः'' इति वा पाठो भवतु । सर्वथा द्वित्वादि संख्यैव । अतो द्वित्वशब्दस्य समुदायपरत्वं स्वीक्रियते लक्षणया, द्वित्वादिव्यंग्यत्वं समुदायस्य वर्तत इति । द्वित्वादीनां तु भगवद्धर्माणां भगवताऽभेद एव धर्मभेदसाधकप्रमाणबलात् । संख्याया तादृशाभेदापवादस्तु कुत्रापि नोक्त इत्यभिप्राय एषाम् । द्वित्वादीत्यस्य लक्षणया समुदायपरत्वात् । 'समुदायस्तु भिन्नगः' इत्यस्यापि एकोपाधिकनानापदार्थरूपेणानेकत्वेन प्रागुक्तरीत्या भेदाभेद इत्येवार्थः ।

तदेतद् व्याख्यानं शेषवाक्यार्थचन्द्रिकाकृद्भिर्नाङ्गीक्रियते । तथाहि शेषवाक्यर्थचन्द्रिका-

''यद्यप्यत्र समुदायस्तु भिन्नग इति मूलानुरोधात्समुदायमात्रे व्यभिचारः शङ्कनीय इत्यनेकत्वसंख्यया तच्छङ्का न स्वरसा, तथापि विशिष्टाकारस्य विशेष्याश्रितद्रव्यान्तरतया प्रधानत्वादुपसर्जनत्वरूपधर्मत्वाभावेन तत्साधारण्येन व्यभिचारशङ्कानुदयादनेकत्वसंख्यामात्राश्रयणेन तच्छङ्केति द्रष्टव्यम् । **समुदायोऽनेकत्वमिति** । न चानेकत्वातिरिक्तस्य समुदाय-स्यैवाभावाद् व्यर्थं व्याख्यानमिति वाच्यम् । वनमिति प्रतीतिविषयीभूतवृक्ष-समुदायस्यैकस्थानसम्बन्धनिमित्तकविशिष्टाकाररूपत्वेन अनेकत्वसंख्या-व्यतिरिक्तस्यापि समुदायस्य सत्वेन तद्व्यावर्तनार्थत्वात् । न चैकस्थानसम्बन्ध एव वनमिति प्रतीतिविषयो न तु तन्निमित्तकविशिष्टाकार इति वाच्यम् । तथा

सति दण्डीत्यादिप्रतीतेरपि दण्डसम्बन्धमात्रविषयकत्वापत्तावतिरिक्त-विशिष्टासिद्धिप्रसङ्गात् । तथा च तत्रैव वनमित्यत्रापि विशिष्टाकार एव विषय इति कथमनेकत्वातिरिक्तसमुदायाभाव इत्युपपन्नं व्याख्यानमिति ध्येयम्'' इति ।

१७. **द्वित्वादिधर्मस्वरूपविचारः ताम्रपर्णी सुब्बाचार्यविरचितः** । अयं ग्रन्थ श्रीमध्वनाथतीर्थश्रीपादानां कृतिमबलम्ब्यैव विरचित इति नेह तन्यते ।

१८. एवं **मध्वसिद्धान्तसारे वेदगर्भपद्मनाभाचार्यविरचितेऽपि ग्रन्थे** (प्रायः1800 A.D) द्वित्वादिसंख्याविचारो वर्तते । तत्रापि व्यासज्यवृत्तित्वं प्रतिपादितं वर्तते ।

अन्येप्यज्ञातग्रन्था अस्मिन् विषये वर्तन्त इत्यत्र नास्ति संशीतिः ।

अस्मिन् पुस्तके चत्वारो ग्रन्था मुद्रिताः सन्ति । प्रथमं तावत् ऐजी वेङ्कटरामाचार्य (श्रीव्यासतत्वज्ञश्रीमच्चरण) कृतो द्वित्ववादार्थः । अस्य तिस्रो मातृका लब्धाः । प्रथमा बेङ्गळूरु पूर्णप्रज्ञविद्यापीठीयग्रन्थागाराल्लब्धा । द्वितीया तु व्यासनकेरे प्रभञ्जनाचार्यैर्दत्ता । अस्याः पाठोऽधस्तनटिप्पणेषु क. सङ्केतेन निर्दिष्टः । तृतीया तु मद्रपुरीप्राच्यग्रन्थागारात् सङ्गृहीता । अस्याः पाठः टिप्पणेषु ग. सङ्केतेन निर्दिष्टः ।

तदनन्तरं श्रीमुष्णवासुदेवाचार्यशिष्यवासुदेवाचार्यकृतो द्वित्वविचारो नाम ग्रन्थो मुद्रितः । अस्य मातृका तु श्री के.टि.पांण्डुरङ्गीमहोदयैर्दत्ता । अयमेव ग्रन्थोऽत्र मुद्रितेषु चतुर्षु प्राक्तनः । द्वित्ववादार्थो यो श्रीव्यासतत्वज्ञश्रीमच्चरणानां ग्रन्थः प्रथमं मुद्रितस्तत्रायं ग्रन्थोऽनूद्य निराक्रियते ।

ततःपरं तृतीयतया श्रीमुष्णवासुदेवाचार्यशिष्यगोपालकृष्णाचार्यविरचितो द्वित्वचिन्तामणिनामको ग्रन्थो मुद्रितः । अस्य मातृका बेङ्गळूरु पूर्णप्रज्ञविद्या-

पीठीयग्रन्थागाराल्लब्धा ।

अन्तिमतया च आर्याचार्यसम्प्रदायानुसारिगोपालकृष्णाचार्यविरचिता द्वित्वमीमांसा मुद्रिता । अस्य ग्रन्थस्यैका मातृका पूर्णप्रज्ञविद्यापीठीय-ग्रन्थागारादपरा च मैसूरुप्राच्यसंशोधनालयाल्लब्धा । द्वितीयमातृकास्थपाठभेदः क.सङ्केतेनाधस्तनटिप्पणेषु सूचितः । चतुर्षु ग्रन्थेषु कालतोऽयमन्तिम इति ज्ञायते इति मुद्रण अयं क्रमोऽनुसृतः ।

तदेवं गुरुपादानां श्रीमच्चरणौ स्मारंस्मारं यथाशक्ति यथामति च विमृश्य संशोध्य चायं ग्रन्थसमुदायः प्रकटितः । अनया सेवया वृन्दावनमन्दिराः श्रीगुरुसार्वभौमाः सुप्रीताः सन्त्विति सम्प्रार्थये ।

मधुगिरि माधवरायसुपुत्रः श्रीमान् नागेन्द्ररायः ग्रन्थमिमं कम्प्यूटर्यन्त्राधारिते स्वीये लक्ष्मीमुद्रणालये शीघ्रं सुन्दरं च मुद्रापितवान् । तस्यापि गुरुवर्याणां कृपादृष्टिमाशास्य विरमामि ।

मैसूरुनगरी
श्रीमुखसंवत्सरस्याश्विनकृष्णप्रतिपत् ।

श्रीगुरुसार्वभौमसेवाकाङ्क्षी
पेरियापट्टणसुब्बरायतनूजः
शेषगिरिरायः

प्रबन्धाः

	पुटम्
१. द्वित्ववादार्थः श्रीऐजीवेङ्कटरामाचार्यकृतः	1-13
२. द्वित्वविचारः श्रीमुष्णवासुदेवाचार्यशिष्यवासुदेवाचार्यकृतः	17-24
३. द्वित्वचिन्तामणिः श्रीमुष्णवासुदेवाचार्यदौहित्रगोपालकृष्णाचार्यकृतः	27-43
४. द्वित्वमीमांसा आर्याचार्यसंप्रदायानुसारिगोपालकृष्णाचार्यकृता	47-70

द्वित्ववादार्थः

श्री ऐजी वेङ्कटरामाचार्यकृतः

श्रीः

अथ ऐजी वेङ्कटरामाचार्य (श्रीव्यासतत्त्वज्ञश्रीमच्चरण) विरचितः

द्वित्ववादार्थः

श्रीगुरुभ्यो नमः।

अपारभवपाथोधितरणे तरिशेखरम् ।
उपास्महे हयग्रीवपदद्वन्द्वमहर्निशम् ॥

अत्र हि द्वित्वं कीदृशमिति नालोचनीयम् । एकत्वसमाहाररूपमिति वा, अपेक्षाबुद्धिजन्यं व्यासज्यवृत्तीति वा, अपेक्षाबुद्धिव्यङ्ग्यं तादृशमिति वा, उपपत्तेः । पक्षत्रयमपि सुधारूढम् । वैशेषिकाधिकरणसुधायां भेदस्य स्वरूपत्वसमर्थनाय तत्पूर्वपक्षरचनावसरे 'एकत्वाभावेऽनेकत्वमपि न स्यात् । तत्समाहाररूपत्वात् तत्कार्यत्वाद्वा तस्य' इति समाहारोक्त्या प्रथमपक्षस्य, तत्कार्यत्वोक्त्या 'समुदायस्तु भिन्नगः' इत्येतव्द्याख्यानावसरे 'समुदायोऽनेकत्वम् । भिन्नगोऽनेकाश्रितः । सत्यमनेकत्वसङ्ख्याऽनेकाश्रिता । तथापि तदन्यत्वेन हेतुविशेषणाददोषः । सा चापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः' इत्युक्त्या च द्वितीयपक्षस्य, 'अपेक्षाबुद्धेरनेकत्वव्यञ्जकत्वात्' इति वैशेषिकाधिकरणीयोक्त्या 'दशत्वसंख्या खल्वपेक्षाबुद्धिजन्या तव्द्यङ्ग्या वा' इत्युपासनापादीयोक्त्या च तृतीयपक्षस्य प्राप्तेः।

समाहारत्वोक्तेः पूर्वपक्षस्थत्वेऽप्यदूषितत्वेन तत्वनिर्णयटीकायां सिद्धान्तस्थत्वेन बाधकाभावेन च स्वपक्षत्वप्राप्तेः। न च द्वित्वत्रित्वयोरविशेषापत्तिः। एकत्वद्वयत्रयसमाहाररूपत्वेन परस्परभेदस्य न्यूनाधिकाश्रयसापेक्षत्वस्य चोपपत्तेः। न चैकत्वगतद्वित्वादेरतिरिक्तसङ्ख्यात्वे पूर्वमेव तथा कल्पयितुं

शक्यत्वेन एकत्वान्तरसमाहाररूपत्वेऽनवस्थितिरिति वाच्यम् । एको घटः तद्गतमेकत्वमेकमेवं तद्गतमिति प्रतीत्याः प्रामाणिकत्वात् एकत्वपरम्परायाः प्रथमैकत्वस्वरूपत्वस्य, उत्पत्तौ उत्पत्त्यन्तराभावेऽपि तयैवोत्पन्नत्वव्यवहारवदेतव्द्यवहारनिर्वाहस्य वा वक्तुं शक्यत्वाच्च । न चैकधर्मिकत्वापत्तिर्नानाधर्मिकत्वानापत्तिश्च । वनस्यैकवृक्षीयदेशमात्रानाश्रितत्वतद्धटितबहुदेशाश्रितत्ववदुपपत्तेः । एवमन्यान्यपि बाधकानि सुपरिहराणि । एवं द्वितीये तृतीये च पक्षे बाधकानि परिहरणीयानि ।

अत्र **श्रीमुष्णवासुदेवाचार्यान्तेवसन्तः** सुधोक्तव्यासज्यवृत्तित्वपक्षे बाधकान्युपन्यस्य चतुर्थपक्षमङ्गीकुर्वन्ति । तत्र बाधकानि तावदित्थं सुपरिहराणि । तथा हि ।

न तावदनेकस्मिन्नेकस्य द्वित्वादेर्वर्तनस्य कृत्स्नैकदेशवृत्तित्वविकल्पपातित्यं बाधकम् । एकस्य पटरूपस्यापि संयोगविशेषविशिष्टतन्त्वात्मके पटे प्रतितन्तु कृत्स्नवृत्तित्वे तन्त्वन्तरे तस्यैव रूपस्याभावापत्त्या एकदेशवृत्तित्वे सावयवत्वापत्त्या निरवयवे एतादृशविकल्पस्यानवकाशे वक्तव्ये प्रकृतेऽपि तौल्यात् । अधिकरणभेदेनाभावभेदाभावेन घटपटोभयसाधारणस्तम्भत्वाभावेऽप्येवं विकल्पापत्तेश्च । एकैकधर्मिप्रतीतावभावप्रतीत्या द्वित्वादेरप्रतीत्या अभावस्य प्रत्येकं पर्याप्त्याख्यसम्बन्धो द्वित्वादेरुभयत्रैव स इति प्रतीतिबलात् कल्प्यम् ।

नापि जात्यादेरप्येवमनेकगतत्वसंभवेन धर्ममात्रस्य प्रातिस्विकत्वानुपपत्तिर्बाधिका । तत्रैकस्यानेकानुगतत्वसाधकस्य निरवकाशस्याभावेन ब्राह्मणान्तरे सत्यपि ब्राह्मणत्वे, एकस्मिन् रसविक्रयादिना तन्नाशस्यागमेन[1] अयसि रसःस्पर्शेन सुवर्णताप्राप्तौ अयस्त्वनाशस्य प्रत्यक्षेण सिद्धस्य बाधकाभावेन च वैषम्यात् । तत्तव्द्यक्त्यसाधारणधर्मस्यानुगमशङ्काया अप्रसक्त्या[2] धर्ममात्रस्य प्रातिस्विकत्वानुपपत्त्यभावाच्च ।

---

[1]*सिद्धस्येत्यनेनान्वयः ।* [2]*बाधकस्य भावेन चेति अधिकःपाठः क.कोशे।*

यत्तु नरत्वादेः प्रत्येकं पर्याप्तत्वेन प्रतीतेः प्रातिस्विकत्वमेव, द्वित्वाद्यनेकत्वसंख्यायास्तु एकस्मिन्नेव वर्तमानत्वस्य व्याहतत्वेनांगीकर्तुमनुचितत्वेनेमौ द्वाविति प्रतीतेश्चानेकधर्मत्वमेवोचितमिति नरत्वादिवैषम्यनियामकमनेकानुगतत्वसाधकमाशङ्क्य सादृश्यभेदयोरपि तथात्वापातादिति दूषितम् । तन्न । सादृश्यादेरेकत्रैव वर्तमानत्वस्य व्याहतत्वाभावात् । इमौ द्वावित्यादि प्रतीतेरप्येकस्मिन् धर्मे द्विधर्मिकत्वावगाहित्वेन अनेकाश्रितत्वसाधकतया सादृश्यादौ तथा प्रतीत्यभावाच्च । इमौ सदृशौ भिन्नावित्यादौ विप्रा भुञ्जत[1] इत्यादाविव प्रातिस्विकसादृश्यादिसमुदायस्यैव प्रतीतेः ।

यदपीत्थमेवाशङ्क्य इमौ द्वावित्यत्रापि परस्परापेक्षद्वित्वद्वयमेव[2] प्रतीयत इति वक्तुं शक्यत एवेति मतान्तरमुपन्यस्तम् । तदतिसाहसम् । तेनायं सदृशो भिन्न अनेन स सदृशो भिन्न इति निरवकाशप्रतीतिबलात् प्रातिस्विकसादृश्यादौ सिद्धे इमौ सदृशावित्यादिप्रतीतेरनुगतातिरिक्तसादृश्यविषयकत्वे गौरवेण परस्परमिति परस्परप्रतियोगिकत्वावगाहनेन च विप्रौ भोजनवन्तावित्यादिवत्[3] समुदायविषयतया सावकाशत्वेन च तत्र समुदायविषयकत्वसम्भवेऽपि प्रकृते प्रातिस्विकद्वित्वसाधकाभावेन बाधकभावेन[4] च तथा कल्पयितुमशक्यत्वात् । एवमपि तथाकल्पने श्वेतद्वीपवैकुण्ठावीश्वरवन्तौ, अकारवन्तावच्युतानन्तशब्दौ, पटत्वाभाववन्तौ स्तम्भकुम्भौ इत्यादिप्रतीतेरपि ईश्वरादिसमुदायविषयकत्वकल्पनापाताच्च । प्रातिस्विकद्वित्वे मानाभावेन तद्द्वयस्यालीकत्वाच्च । ईश्वरौ द्वौ, अव्याकृताकाशौ द्वौ, इत्यादिप्रतीतेः प्रमात्वापाताच्च । विशेष्यप्रकारसम्बन्धांशे बाधाभावात् । प्रातिस्विकत्वेन सर्वसिद्धैकत्वद्वयरूपैकत्वसमाहारपक्षस्य सुधोक्तस्य परित्यागेन प्रातिस्विकत्वेन सर्वासिद्धद्वित्वद्वयविषयकत्वकल्पनस्य चमत्कारपारावारसुधाकारतिरस्कारसम्पादितस्वीयाचमत्कारावहत्वाच्च । समाहारपक्षे एकत्वसङ्ख्ययैव सर्वनिर्वाहे एकस्मिन् घटे एकत्वातिरिक्तद्वित्वाद्यनन्तसंख्याकल्पने गौरवाच्च ।

---

[1]*विप्रा भुक्तवन्तः-क* [2]*परस्परसापेक्ष-क*
[3]*विप्रा भोजनवन्त इत्यादिवत्-ग* [4]*बाधकाभावेन-ग ।*

समुदायविवक्षया घटपटयोर्द्वित्वमिति व्यवहारेपि प्रत्येकविवक्षया घटपटयोर्द्वित्वे इति घटस्य द्वित्वमिति (च) निर्बाधव्यवहारापाताच्च । द्वित्वद्वयविषयकत्वकल्पने द्वित्वद्वयगतद्वित्वस्य तद्गतद्वित्वद्वयसमाहाररूपत्वेन द्वित्वमेकं न तु द्वे इति सर्वसिद्धप्रतीत्या विरोधापाताच्च । द्वित्वसमाहारबुद्धेः समाह्रियमाणप्रातिस्विकद्वित्वद्वयविषयापेक्षाबुद्धिसापेक्षत्वापत्त्या प्रत्येकमेकत्वविषयकापेक्षाबुद्धेरनपेक्षणापाताच्च । आकाशत्वव्याप्यानेकत्वसंख्याङ्गीकारापाताच्च।

यच्चोक्तं परस्परसापेक्षमिति। तन्न। स्थितौ सापेक्षत्वस्य भवन्मते द्वित्वस्य यावद्द्रव्यभावित्वेन घटगतद्वित्वस्य पटनाशात्तद्गत (पटगत) द्वित्वनाशेऽपि घटनाशाभावात् सत्वेन अयोगात्। प्रतीतौ सापेक्षत्वस्य चान्योन्याश्रयापत्त्या अयोगात्। एकप्रतीतिविषयत्वस्य द्वित्वद्वयं प्रतीयत इत्यनेनैव सिद्धौ सापेक्षमित्यस्य वैयर्थ्यात्। निरपेक्षयोरपि स्तम्भकुम्भयोरेकप्रतीतिविषयत्वेन तस्य तद्रूपत्वाभावाच्च । एकप्रतीतिविषयत्वनियमस्य च प्रत्येकं शाब्दादिप्रतीतिसम्भवेनाभावात् । एकप्रत्यक्षविषयत्वनियमस्यापि घटपटौ द्वावित्यत्र प्रतीयमानस्यैव घटगतद्वित्वस्य घटस्तम्भावित्यत्राप्रतीत्या अभावात्। नित्यातीन्द्रियगतद्वित्वयोः सापेक्षत्वानापाताच्च । स्वेतरद्वित्वाविषयकप्रत्यक्षाविषयत्वस्य तु परस्परसापेक्षत्वरूपत्वाभावात् अतीन्द्रियेऽतिप्रसङ्गाच्च (अयोगात्)। तस्मात् परस्परसापेक्षं द्वित्वद्वयं प्रतीयत इति न युक्तम्।

किञ्च कथमेकत्वाश्रयस्य घटस्य द्वित्वाश्रयत्वम् ? स्वयमेकस्यापि पदार्थान्तरेण द्वित्वाद्युपपत्तिरिति चेन्न । पदार्थान्तरस्य एतद्गतद्वित्वं प्रति प्रतियोगित्वस्य धर्मित्वस्य वा अभावेन तृतीयार्थायोगात्। तथा च न प्रातिस्विकं द्वित्वमिति।

एवं च "तथा च प्रातिस्विकमेव द्वित्वं सादृश्यादिवत्। इयांस्तु विशेषः। सादृश्यादिकं पदार्थान्तरनिरूपितमेकप्रतिभान एव स्वप्राधान्येन प्रतीयते । द्वित्वादिकं तु नैकधर्मिप्रतीतौ पदार्थान्तरनिरूपितं प्राधान्येन प्रतीयते। द्वित्वादेः रूपादिवत् प्रतियोगिनिरपेक्षत्वात्। किन्त्वनेकधर्मिस्वरूपं तद्गतं च द्वित्वादि समुदितं समप्रधानभावेन परस्परसापेक्षं प्रतीयत इति न कश्चित्क्षुद्रोपद्रवः" इत्युक्तिरभित्तिचित्रायिता । प्रातिस्विकद्वित्वस्यासिद्धेः[1] । समुदितयोर्द्वित्वयोरेकधर्मिस्वरूपत्वस्य[2] प्रत्येकमयोगाच्च । प्रत्येकं तत्तद्धर्मिस्वरूपस्य समुदितस्यानेकस्वरूपत्वे घटपटरूपादेरप्येवमापत्तिश्च। समुदायस्यैकस्यानेकस्वरूपत्वे अनेकेषामभेदापत्तेश्च । समुदायस्यानेकानुगतस्य भिन्नाभिन्नत्वे द्वित्वस्यैव तथात्वसम्भवाच्च। समप्रधानभावेनेत्यस्य विशेष्यतयेत्यर्थकत्वस्य इमौ द्वावित्यत्राभावेन, प्रकारतयेत्यर्थकत्वायोगेनानयोर्द्वित्वमित्यत्राभावेन च, विषयतयेत्यर्थकत्वस्यायोगेन नियामकाभावेन चायोगाच्च । सापेक्षत्वस्यायोगाच्च [3] । किञ्च द्वयोर्भावो द्वित्वं नत्वेकस्य भाव इति द्विधर्मत्वस्य प्रतीतेर्नैकधर्मत्वम् । न च घटानां भाव इति प्रतीत्या घटत्वस्याप्यनेकानुगतत्वापत्तिः, भाव इत्यस्य समुदायविषयकत्वे प्रकृतेऽपि तौल्यमिति शङ्क्यम्। द्वित्वे नत्वेकस्येत्येकधर्मत्वनिषेधवत् न तु घटस्येति निषेधाभावेन प्रत्युत घटस्य भाव इत्येकधर्मत्वप्रतीत्या च वैषम्यात्। अपि च द्वित्वस्य प्रातिस्विकत्वे रूपादिवदेकधर्मिप्रतीतावपि प्रतीत्यापत्तिः। धर्म्यन्तरगतद्वित्वेन सहैव द्वित्वं भासत इत्यत्र नियामकाभावात् । द्वित्वस्वभावस्यैव नियामकत्वकल्पनं तु चक्षुरादेः पुरोवृत्तिप्रकाशकत्वादिकं स्वभावेन न तु संयोगादिप्रयुक्तम्, आनन्दादेर्धर्मधर्मिभावादिकमपि स्वभावेनैव न तु विशेषप्रयुक्तमित्याद्यतिप्रसङ्गाधायकत्वेन मीमांसाशास्त्रविप्लवकरत्वादपहास्यम्।

यदपि द्वित्वस्यानेकधर्मत्वे भावाभावधर्मत्वं ततश्च भावाभावस्वरूपत्वं स्यादिति बाधकम् । तदपि न । अभावधर्मस्यापि प्रमेयत्वादेर्भावत्वस्य

---

1 *प्रातिस्विकत्वस्यासिद्धेः-क.।* 2 *अनेकधर्मिस्वरूपत्वस्य-क. ग*
3 *सापेक्षत्वस्य दुर्वचत्वाच्च-क.। सापेक्षत्वस्य दुर्वारत्वाच्च-ग*

भावधर्मस्याप्यन्योन्याभावादेरभावत्वस्य च सद्भावेन " अभावस्य च धर्माः स्युर्भावास्तेषां च तेऽखिलाः " इत्यादि मूलबलेन च द्वित्वस्य भावत्वस्योपपत्तेः।

किञ्चापेक्षाबुद्धिजन्यस्य तन्नाशनाश्यस्य कथं प्रातिस्विकत्वम् ? लाघवेनोभयानुगतस्यैव जन्यतया सिध्यतः प्रातिस्विकत्वायोगात् । न चापेक्षाबुद्धिजन्यत्वमयुक्तं यावत्सत्वमेक एव घट इतिवत् यावत्सत्वं घटपटौ द्वावेवेत्यादिप्रतीतिव्यवहाराभ्यां यावद्धर्मिसत्वं द्वित्वादेरपि सत्वावधारणादिति वाच्यम् । सर्वदा गङ्गापात्रं प्रवाहवदेव , गृहं दीपवदेव , यावदायुर्देवदत्तः शरीरवान् , इत्यादिवदागमापायवदनेकद्वित्ववत्वेऽपि प्रतीत्यादेरुपपत्तेः। प्रवाहादीनां क्षणभङ्गुरत्वं सिध्दान्तसिध्दम् । अपेक्षाबुध्देर्व्यञ्जकत्वमिति तु न वक्तव्यम् । अन्वयव्यतिरेकाभ्यां तज्जन्यत्वसिध्देः । व्यञ्जकत्वमादायान्यथासिध्दत्वे कुलालव्यापारादेरपि तथात्वापत्त्या घटस्यापि व्यङ्ग्यत्वापत्तेः । व्यञ्जकत्वमित्यस्यापि पक्षान्तरत्वाच्च ।

यत्तु अपेक्षाबुध्दिजन्यत्वं द्वित्वस्य प्रत्यक्षस्थल एव उतान्यत्रापीति विकल्प्य आद्ये प्रत्यक्षतदितरप्रमाणयोः समानविषये वैलक्षण्यानुपपत्तिमभिधाय सादृश्यात् समानविषयत्वमित्यस्य चातिप्रसङ्गमभिधाय अन्त्ये द्वा सुपर्णेत्यादि वैदिकैः पञ्च फलानीत्यादि लौकिकैवाक्यैश्चापेक्षाबुध्दिं विनैव शाब्दादिदर्शनेन अपेक्षाबुध्दिजन्यद्वित्वविषयत्वायोग इत्यभिहितम् । तन्न । द्वित्वमात्रस्यापेक्षाबुध्दिजन्यत्वेन प्रत्यक्षादेः समानविषयत्वे बाधकाभावात् । प्रत्यक्षस्य स्वसमानाधिकरणापेक्षाबुध्दिजन्यवर्तमानद्वित्वस्यैव स्वयोग्यत्वात् तन्मात्र विषयकत्वं , अनुमानादेस्तु द्वित्वसामान्यविषयकत्वमित्येतत् तु प्रवाहवत् पात्रमित्यादिप्रत्यक्षस्य वर्तमानमात्रप्रवाहादिविषयत्वं तद्विषयकानुमानादेस्तु प्रवाहादिसामान्यविषयकत्वमितिवद् युज्यते । न हि देवदत्तसाक्षिणः प्रत्यग्रदेवदत्तीयमानसज्ञानविषयत्वं देवदत्तीयचाक्षुषस्य प्रत्यग्रप्रवाहविषयत्वं तदीयानुमित्यादेस्तु पात्रगतप्रवाहसामान्यविषयत्वमित्येतावता प्रत्यक्षे

दृष्टिसृष्टिः । प्रत्यक्षं स्वयोग्यविषयसिध्द्यै अपेक्षाबुद्धिमपेक्षते । आगमादिकं तु तन्निष्ठद्वित्वादिमात्रस्य स्वयोग्यत्वात् कुतोऽपेक्षेत ? अतो न काचिदनुपपत्तिः ।

यदपि देवदत्तयज्ञदत्ताभ्यामेकदा प्रतीयमानं घटपटद्वित्वमेकं चेत् प्रातिस्विकापेक्षाबुद्धिजन्यत्वायोगः, अनेकं चेद् दृष्टिसृष्टिरिति । तदपि न । एकपङ्क्तौ भुञ्जानैरनुभूयमानसुखादिवत् एकदाऽनेकैरनुसन्धीयमानदृष्टत्वादिवच्च भिन्नत्वेऽपि दृष्टिसृष्ट्यनापत्तेः। तेनानुभूतमेव द्वित्वं मयाऽनुभूयत इति तु व्यवहारस्तेनानुभूतमेव दुःखं मयाऽनुभूयत इतिवदुपपन्नः ।

यदपि "स्वापेक्षाबुद्धिजन्यद्वित्ववदन्यापेक्षाबुद्धिजन्यं द्वित्वं प्रतीयते न वा । आद्ये द्वित्वद्वयविषयकत्वस्य स्वप्रतीतावननुभूयमानत्वेन एकद्वित्वविषयकत्वस्यैवानुभूयमानत्वेन चानुभवविरोधः । द्वितीये अप्रतीतौ कारणाभावः । अन्यापेक्षाबुद्धेः स्वाप्रत्यक्षत्वं न तज्जन्यद्वित्वाप्रत्यक्षे कारणम् । अप्रयोजकत्वात् । कुलालबुद्धिजन्यघटादेरितराप्रत्यक्षत्वापाताच्च । अपेक्षाबुद्धिजन्यद्वित्वादिकमन्यातीन्द्रियमिति तत्स्वभावः कल्प्यत इति चेत् कल्पकाभावात् । अन्याप्रतीतिबलादेव तत् कल्प्यत इति तु न । अन्योन्याश्रयापत्तेः" इति । तदपि न । अपेक्षाबुद्ध्यन्वयव्यतिरेकादिना द्वित्वस्य तज्जन्यत्वसिद्धौ तद्भेदेन द्वित्वान्तरसिद्धौ तदप्रत्यक्ष(त्व)रूपकार्यबलेन कारणकल्पनेऽन्योन्याश्रयाभावात् । एकत्रत्ययोरपि भगवद्रूपयोः स्वोपासनावतैव दृश्यत्ववत् स्वजनकापेक्षाबुद्धिमतैव दृश्यमानत्वं युक्तमित्युत्पश्यामः ।

यदप्यनेकसामग्रीसमाजेन एकद्वित्वादिकमनभिमतमाशङ्क्य सामग्रीसमाजेनैककार्यादर्शनेनादृष्टकल्पनत्वेन दूषितम् । तदपि न । प्रातिपदिकप्रथमाभ्याम् एकवचनैकशब्दाभ्यां चैकार्थबोधस्य, अनेकद्योतकैरेकार्थद्योतनस्य, अनेकैरपि तक्षकैरेकस्तम्भनिर्माणस्य दर्शनेनादृष्टकल्पनाभावात् ।

सामग्रीसमाजे कार्यैक्ये क्वापि कार्यभेदो न स्यादिति त्वयुक्तम् । असमाजे वा कार्यतावच्छेदकभेदे वा तदुपपत्तेः ।

यत्तु सामान्यविशेषसामग्रीजन्यैककार्यनिदर्शनेन त्वैक्यमाशङ्क्य तदतिरिक्तसमाजे अदर्शनेन दर्शनमात्रस्याप्रयोजकत्वेन च दूषितम् । तदपि न । तदतिरिक्तसमाजेष्वैक्यसंभवात्[1] । पूर्वं दर्शितत्वाच्च । दर्शनस्य सम्भवप्रयोजकत्वाच्च[2] । "सामग्रीभेदेन कार्यभेदसाधने सामान्यविशेषसामग्रीस्थले व्यभिचारो नास्ति । बहुसामग्रीसमावेशस्य कार्यभेदाव्यभिचरित्वेन तस्यैव साधन(क)त्वात्" इति तु न युक्तम् । विशेषसामग्रीस्थले सामान्यधर्माणामनेकत्वेन तदवच्छिन्नसामग्रीणामनेकत्वेन व्यभिचाराभावात् । उभयापेक्षाबुद्धिस्थले बहुसामग्रीभेदाभावाच्च । तस्मादपेक्षाबुद्धिजन्यत्वे न किञ्चिद् बाधकम् ।

यदपि पुनरनेकानुगतत्वे बाधकमुपन्यस्तं "वर्तमानैष्यतोर्द्वाविति[3] पदेन प्रतीयमानं द्वित्वमेकस्य धर्मिण एष्यतादशायामपि किमुभयानुगतमुत्पत्त्यादिमत् उतैष्यदुत्पत्तिपर्यन्तमेकमात्रवृत्ति सदनन्तरं तत्रापि वर्तमानं सदनुगतं भवति । नाद्यः । अविद्यमाने धर्मिणि धर्मोत्पत्त्यादेरनुपपत्तेरसति धर्मिणि धर्मोत्पत्त्यादेरसंभवात् । न द्वितीयः । पूर्वमेकत्र सतो धर्मस्य कालान्तरे धर्म्यन्तरोत्पत्तौ तत्सम्बन्धकल्पनस्याप्रामाणिकत्वात् । सम्बन्धकारणाभावाच्च । एकत्र पर्याप्तस्य निष्क्रियस्य स्वतः परतो वा गत्यभावेनैवंकल्पनस्य निर्मूलत्वात् । एव घटपटोभयगतं द्वित्वं तयोरेकस्मिन् नष्टे तस्मादपसरतीत्यप्रा[illegible]िकं कल्पनीयम्" इति । तदपि न । द्वित्वमपेक्षाधीजन्यमिति वदन्तो यदा धर्मिद्वयरूपोपादानसत्वं, अपेक्षाबुद्धिरूपनिमित्तसत्वं च तदैव द्वित्वोत्पत्तिमङ्गीकुर्वन्ति । न पुनरुपादाननिमित्तासत्त्वदशायाम् ।

[1] *समाजे ऐक्यसम्भवात्-क* [2] *सम्भवप्रयोजनकत्वाच्च-ग* [3] *वर्तमानैष्यद्घटयोर्द्वाविति-क*

वर्तमानैष्यतोस्तथादशायां द्वित्वप्रत्यक्षं न जायत एव । शाब्दप्रतीत्यादिकं तु भविष्यद्द्वित्वविषयं परस्पराश्रयभेदसमानाधिकरणैकत्वद्वयविषयं वा । अपेक्षाबुद्धिविशेषविषयत्वविषयं वा । वर्तमानद्वयस्थले त्वेकत्वातिरिक्तस्य द्वित्वस्य प्रत्यक्षत्वादनुगतद्वित्वविषयकत्वम् । धर्मिणोरन्यतरस्यानुत्पत्तौ नाशे वा द्वित्वं नोत्पन्नं नष्टमिति प्रतीतेश्च । द्वित्वनाशे ऐक्यं स्यादिति तु नापादनीयम् । धर्मिण एवाभावेन तदापादनासम्भवात् । पटप्रतियोगिकभेदस्वरूपस्य घटस्य नाशेन घटस्वरूपभेदनाशेऽपि धर्मिण एवाभावेन पटाभेदाप्रसक्तेस्तैत्तिरीयोपनिषद्भाष्यादौ निपुणतरमुपपादितत्वात् । वर्तमानौ द्वौ एष्यद्वर्तमानौ द्वौ इति प्रतीत्योर्विषयवैलक्षण्यमुक्तयुक्तिसिद्धम्, पट उत्पन्नो देवदत्त उत्पन्न इति प्रतीत्योरिव सम्भावितं भवदभिमतं च । भवद्भिर्वर्तमानयोः प्रतीयमानं द्वित्वमनेकधर्मिस्वरूपं तद्गतं समुदितं परस्परसापेक्षमित्यूरीकृतम् । न च वर्तमानैष्यतोः प्रतीयमानमनेकधर्मिस्वरूपम् । नापि समुदितम् । समुदाय्यभावेन समुदायाभावेन समुदितत्वायोगात् । कालानवगाहनेन प्रतीत्यभावेन वर्तमानैष्यद्द्वित्वयोर्वर्तमानत्वस्यैष्यत्त्वस्य वाऽवगाहने भ्रान्तित्वापातेन वर्तमानत्वैष्यत्त्वयोर्ग्रहणे च समप्राधान्यस्य चायोगात् । तस्माद् विभिन्नमात्रकालयोधर्मिणोर्द्वित्वं नोत्पद्यत एव । समनियतकालयोरपेक्षाबुद्धिसत्त्वे उत्पद्यत एव । कादाचित्कसमावेशयोस्तु समावेशदशायामेवोत्पद्यते अन्यतरधर्मिनाशतोऽपि नश्यत्येव । अनेकपर्याप्तधर्मसत्वं प्रति यावद्धर्मिसत्वस्य तन्त्रत्वात् । तथाच नेदं बाधकम् । यदपि "वर्तमानैष्यतोः प्रतीयमानस्य द्वित्वस्य वर्तमानमात्रोपादानकत्वे एष्यद्धर्मत्वानुपपत्तिः । अन्योपादानकस्यान्यधर्मत्वायोगात् । अन्यथा मनःपरिणतानां ज्ञानादीनामात्मधर्मत्वापत्तेः । नह्युपादानं विनोपादेयं पृथग् गच्छतीति भगवत्पादैरुक्तत्वेन गमनाभावेनैष्यदुत्पत्त्यनन्तरं तन्निष्ठतया प्रतीत्यनुपपत्तिश्च । अपेक्षाबुद्धिजन्यस्य तन्नाशनाश्यस्यैष्यदुत्पत्तिपर्यन्तमवस्थानानुपपत्तिश्च । उभयोपादानकत्वमन्यतरस्यासत्वादेवायुक्तम्" । इति । तदप्युक्तरीत्यैव परास्तम् ।

उभयसत्ताकाल एवोत्पत्त्युपगमेन प्रतीतेरेष्यदादिविषयत्वेन च दोषाभावात्। एतेन वर्तमानमात्रोपादानकस्य तस्मिन्नष्टे स्वयं नाशेनैष्यद्धर्मत्वानुपपत्तिरिति निरस्तम् । समावेशकाल एवोत्पत्त्युपगमेनापेक्षाधीनाशेन, धर्मिनाशे सति तन्नाशेन च, नाशोपगमेन कदाप्यसमावेशे द्वित्वस्यैवानुत्पत्त्या प्रतीतेः परस्पराश्रयभेदसमानाधिकरणैकत्वद्वयविषयकत्वेन, अपेक्षाबुद्धिविशेषविषयत्वविषयकत्वेन वोपपत्तेरुक्तत्वेन बाधकाभावात् द्वित्वप्रतीतेरविशेषेऽपि विषयवैलक्षण्यमन्यथानुपपत्त्या घट उत्पन्नो देवदत्त उत्पन्न इति प्रतीत्योरिव सह्यम्। [1]भवद्भिरपि वर्तमानस्थले वर्तमानद्वित्वद्वयस्य वर्तमानैष्यतोर्वर्तमानैष्यद्द्वित्वयोर्वर्तमानमात्रद्वित्वस्य वा अतीतानागतयोरतीतयोरनागतयोश्च धर्मिणोस्तादृशद्वित्वयोः सदसती इत्यत्र च एकस्यैव द्वित्वस्य प्रतीतेरवश्यं वक्तव्यत्वाच्च । एकद्वित्वप्रतीतिस्थले एकमात्रधर्मिकत्वप्रतीत्यापत्तेभ[illegible]न्मतमेवायुक्तम् । अस्माभिस्त्वेकमात्रधर्मिकमेकत्वमेव द्वित्वं तु तादृशं नोपेयत इति न किञ्चिदपि बाधकम्।

यदपि जीवेश्वरौ जडेश्वरावित्यादौ जीवजडयोरुपादानत्वसम्भवेऽपि एकोपादानकस्योभयधर्मत्वायोगेन "द्वावेतौ नित्यमुक्तौ" इति श्रूयमाणेशलक्ष्मीद्वित्वस्यान्यतरोपादानकत्वस्याप्यसम्भवेनास्मद्रीतेरेवादरणीयत्वे अन्यत्रापि तथैवेति । तदपिन । ईश्वररमयोरुपादानत्वसम्भवात् । न च निर्विकारत्वश्रुत्यादिव्याकोपः । "पराधीनविशेषाप्तिरनिवर्त्योऽन्यथाभवः क्षीरादिवद् विकारः स्यान्नैव स स्याद् हरेः क्वचित् " इत्यनुभाष्ये पराधीनविशेषस्य द्रव्यान्तरापत्तिरूपस्य च विकारस्य च निषेधेन विशेषनिषेधे शेषाभ्यनुज्ञानमिति न्यायेन गुणाकारपरिणामस्यांगीकारात्। विः विरुद्धः कारः प्रकारो विकारः, पूर्वभावापगमेन भावान्तरापत्तिरिति यावत् । तादृशस्तु द्रव्यान्तरत्वापत्तिरेव। न हि क्षीरस्य तद्भावापगमेन दधिभाववत् पूर्वभावापगमेन गुणभावः। घटो रूपीत्येव प्रतीतेः। तथा चास्य विकारशब्दार्थत्वाभावेन

[1] *अस्पष्टमिदं वाक्यम् ।*

तदङ्गीकारे बाधकाभावात् । कूटस्थत्वेनाङ्गीकृतेऽव्याकृताकाशेऽपि सुधायाम् "न च निरवयवं क्वापि परिणतं दृष्टम्। आकाशं संयोगादिमदुपलब्धमिति चेन्न। द्रव्याकारपरिणामस्य प्रकृतत्वात्" इत्यनेन गुणाकारपरिणामस्यांगीकृतत्वाच्च। न्यायामृते च कर्तृत्वाध्यासभङ्गे" आकाशस्य संयोगाश्रयत्व इवात्मनो ज्ञानरूपगुणाश्रयत्वेऽपि द्रव्यान्तरत्वापत्तिरूपविकारानापातात्" इत्युक्तत्वाच्च। "नच लाघवात् कार्यमात्रं विकारः। तथात्वे मृद् घटाद्यात्मना विकरोतीतिवत् दण्डसंयोगादिमति पुरुषे पुरुषः संयोगाद्यात्मना विकरोतीति प्रतीतिप्रसङ्गादिति भावः" इति **विजयीन्द्रश्रीपादैरामोदे** विवृतत्वाच्च।

केचिदीश्वरादौ प्रकृत्युपादानकं द्वित्वमातिष्ठन्ते । तत् प्रकृतिविधुरत्वेनान्योपादानकस्यान्यधर्मत्वायोगेन धर्मिणाऽत्यन्तभेदापातेन चातिसाहसम् । नचैवमीश्वरगतद्वित्वस्य तेन भिन्नाभिन्नत्वावश्यंभावेन "भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भवः" इत्युक्तप्रकारेण दोषापत्तिः। अभेदस्य स्वाभाविकत्वेनाभेदमात्रस्यैव दुःखाद्यनुसन्धानप्रयोजकत्वेन च जीवाभेदे दोषित्वप्राप्तावपि प्रकृते तदभावात्। नापि 'एकमेवाद्वितीयम्, नेह नानाऽस्ति किञ्चन, एवं धर्मान् पृथक् पश्यन्' इत्यादि श्रुतिविरोधः । 'विशेष्यतैव धर्मित्वम्' इत्यत्र विशेषणतैव धर्मत्वमिति सुधोक्त्या 'सर्वधर्मोपपत्तेश्च' इत्यत्र 'सर्वेषां धर्माणां गुणानां दोषाभावानाम्' इति च सुधोक्त्या अभावस्यापि धर्मत्वेन भिन्नत्वेन च धर्माभेदप्रमाणानां सङ्कोचेऽवश्यं वक्तव्ये[1] उक्तसाधकनिकायेन भिन्नाभिन्नत्वे सिद्धे व्यासज्यवृत्तिसङ्ख्यातिरिक्तविषयत्वस्य

[1] *सुधायामदृश्यत्वाधिकरणे अगोत्रमित्यादिश्रुत्यर्थविचारावसरे गोत्राद्यभावो भगवतो भिन्न एव, तथापि न एवं धर्मानिति श्रुतिविरोधः, अभाववत्त्वस्यैव धर्मत्वात् तस्य च भावरूपत्वादित्युक्तम् । असदधिकरणे च विशेष्यतैव धर्मित्वमित्यनुव्याख्यान व्याकरणावसरे "विशेषणतैव धर्मत्वमित्यपि द्रष्टव्यम्। प्रतीयते च विशेष्यविशेषणभावो भावाभावयोः। अन्यथा घटः पटो न भवतीति अभावः प्रमेय इति च व्यवहारस्यानुपपत्तेः। तत्कथं भावाभावयोर्न धर्मधर्मिभावः" इत्युक्तम्। "अभावस्य च धर्माः स्युर्भावास्तेषां च तेऽखिलाः" इत्यनुव्याख्यानेऽपि अभावस्य धर्मत्वमुक्तम् । अभाववत्त्वस्य धर्मत्वे अभेदश्रुतिसङ्कोचो नास्ति, अभावस्य धर्मत्वे तु सङ्कोच आवश्यक इति सुधाकाराणामाशयावबोधोऽवश्यं सम्पादनीयः।*

वक्तुं शक्यत्वात्।

"न केनचिदभेदोऽस्ति भेदाभेदोऽपि वा क्वचित्।
समुदायमृते विष्णोः स्वगुणादीन् विनापि वा ॥"

इति भगवत्पादोदाहृतश्रुतिवाक्येन 'समुदायस्तु भिन्नगः' इत्यनुव्याख्यानेन च धर्माभेदप्रमाणानामेव सङ्कोचस्य निर्णीतत्वाच्च। 'समुदायो द्वित्वम्' इति सुधायामेवोक्तम्।

एवं सत्यपि श्रुतिवाक्यं भगवत्पादीयवाक्यं चान्यार्थं सुधा तु तत्वस्यातिगोप्यत्वात् प्रातीतिकार्थमवलम्ब्य प्रवृत्तेति वदन्तः सुधाकारानुसारिभिरित्थं प्रष्टव्याः। इदानीन्तनाधिकार्यर्थं निर्मितग्रन्थे कथमयोग्यं प्रमेयं भाष्यकारा अभिहितवन्तः, टीकाकारा वा तादृशमनभिधाय प्रतीतिकमसन्तमर्थमवलम्ब्य[1] शिष्यान् वञ्चितवन्तः? । भ्रन्त्योचुरिति प्रलापितं चेत् कथं विलक्षणप्रज्ञैर्भवद्भिर्ज्ञातं वचने मौनं चाश्रितमिति।

द्वित्वस्य भगवद्धर्मस्य पूर्णत्वेन प्रमितस्यापूर्णजीवादिधर्मत्वमयुक्तमिति तु न। भगवद्धर्मेप्यभावरूपे भिन्ने धर्मे इव भिन्नाभिन्नेऽपि पूर्णत्वाभावस्येष्टत्वात्।

यच्च बहुना ग्रन्थेन प्रत्यक्षस्थल इव शाब्दस्थले जन्यत्वं व्यङ्ग्यत्वं वा कुतो नास्तीति विचार्य शाब्दादिस्थले विनाप्यपेक्षाबुद्धिं पदार्थस्मरणादिसामग्रीवशात् शाब्दबोधानुभवेन न तत्र जन्यत्वं व्यङ्ग्यत्वं वा। किन्तु प्रत्यक्षस्थल एव। तत्रापि व्यङ्ग्यत्वमेवेति। तन्न। अपेक्षाधीजन्यत्ववादिना[2] शाब्दादिस्थलसिद्धद्वित्वस्य केनाप्यनङ्गीकारेण शाब्दादेरपेक्षाबुद्धिं विनैव स्वपरसाधारणापेक्षाबुद्धि जन्यातीतानागतवर्तमानद्वित्वसामान्यविषयकत्वस्योपपादितत्वेन जन्यत्वे

1. *असंगतमर्थम्-क* 2 *शब्दादिस्थलेत्यारभ्य विनैवेत्यन्तस्यार्थो न स्पष्टः। शब्दादेः स्वपरसाधारणेत्याद्यन्वयः सुगमः।*

बाधकाभावेन पदार्थस्मरणस्य शाब्दहेतुत्वस्य सिद्धान्तविरुद्धत्वेन चायुक्तभाषणत्वात्।

तस्मादपेक्षाबुद्धिजन्यत्वमनेकानुगतत्वमिति द्वितीयः पक्षो निर्बाधतरः।

एवं व्यङ्ग्यत्वपक्षोऽपि सुधोक्तिबलादङ्गीकर्तव्यो न तु त्वदुक्तयुक्ति विभीषिकया त्याज्यः। व्यङ्ग्यमपि द्वित्वं नित्यद्वयगतं नित्यं, नित्यानित्यगतमनित्यमात्रगतं वा यावद्धर्मिद्वयसत्वभावि। सर्वमपि भिन्नाभिन्नमुक्तविशेषप्रमाणबलात्।

यद्वा परस्परप्रतियोगिकस्वाश्रयभेदसमानाधिकरणमेव द्वित्वं भिन्नाभिन्नं विशेषप्रयुक्तं तु द्वित्वमत्यन्ताभिन्नम्। यद् यदभिन्नाभिन्नमिति न्यायस्येष्टत्वात्। यत्र त्वाश्रययोरभेदप्रसक्तिस्तत्रैव भेदाभेदबोधकं समुदायमृते इत्यादिकमपि[1]। एतत्पक्षे द्वित्वं स्वपर्याप्त्यधिकरणधर्मिभेदभिन्नमेव नापेक्षाबुद्धिभेद-प्रयुक्तानन्तभेदवदिति लाघवमवधेयम्। **तस्मादयं पक्षो निर्बाधतम इति सङ्क्षेपः ॥**

सुधावधीरणेतोऽपि दुदूषयिषते परम्।
निवारयति तत्रत्या तत्ववाद्यनुबन्धिता।
वेङ्कटेशनृसिंहार्यशिष्येण तनयेन च।
द्वित्वं व्यचारि सदयं विदांकुर्वन्तु सूरयः ॥

इतिश्री ऐजीवेङ्कटरामाचार्यकृतो द्वित्ववादार्थः समाप्तः ॥

श्रीकृष्णार्पणमस्तु

1 *यत्र त्वाश्रययोरभेदप्रसक्तिस्तत्रैव भेदाभेदकथनम्। समुदायमृते इत्यादिकमपि तादृशद्वित्वाभिप्रायकम्-क*

द्वित्वविचारः

श्रीमुष्णवासुदेवाचार्यशिष्यवासुदेवाचार्यकृतः

श्रीः

श्रीमुष्णवासुदेवाचार्यशिष्यवासुदेवाचार्यकृतः

द्वित्वविचारः

श्रीवेदव्यासाय नमः

श्रीवासुदेवार्यहृदब्जसंस्थश्रीमध्वहृत्पद्मगतः परेशः ।
श्रिया भुवा ब्रह्मभवादिभिः सुरैर्जयत्यलं सेवितपादपद्मः ॥

वन्दे श्रीराजगोपालं राजीवायतलोचनम् ।
सौन्दर्यौदार्यसज्ज्ञानशक्त्यादिगुणरूपिणम् ॥ २ ॥

भगवत्यस्मिन्(ग्रन्थे) द्वित्वाद्यनेकत्वसंख्या विचार्यते। द्वित्वाद्यनेकत्वसंख्या अनेकनिष्ठा नैकत्ववत् प्रातिस्विकी सर्वत्रापेक्षाबुद्धिजन्या तन्नाशनाश्या चेति तार्किकादयो मन्यन्ते । अस्मत्पक्षे च द्वित्वादिकं सर्वत्रापेक्षाबुद्धिजन्यं तन्नाशनाश्यं व्यासज्यवृत्तीति सुधादावप्युक्तम्।

तत्र द्वित्वादिकं कथं व्यासज्यवृत्ति ? अनेकस्मिन् एकद्वित्वादेर्वर्तनस्य कृत्स्नैकदेशवृत्तिविकल्पपातित्यात् । जात्यादेरप्येवमनेकानुगमसम्भवे धर्ममात्रस्य प्रातिस्विकत्वानुपपत्तेश्च। नच नरत्वादीनां प्रत्येकमेकैकस्मिन्नेव पर्याप्ततया प्रतीतेः प्रातिस्विकत्वमेव। द्वित्वाद्यनेकत्वसंख्यायास्तु एकस्मिन्नेव वस्तुनि सत्त्वस्य व्याहतत्वेनांगीकर्तुमनुचितत्वात् इमौ द्वावित्यादिप्रतीतेश्चानेकधर्मत्वमेवोचितमिति वाच्यम् । सादृश्यभेदयोरपि तथात्वापातात्। तयोरपीमौ भिन्नावित्यादि प्रतीतेः।

नन्विमौ सदृशावित्यत्र प्रातिस्विकमेव सादृश्यं विप्राणां भोजनमित्यत्रेव

प्रतीयते। तथाच इमौ सदृशौ इति प्रतीतौ तेनायं सदृशः स चानेन सदृश इति सादृश्यद्वयं प्रतीयमानं प्रातिस्विकमेव पदार्थद्वये वर्तते इति चेत्। तर्हि इमौ द्वावित्यत्रापि परस्परसापेक्षं द्वित्वमेव प्रतीयत इति वक्तुं शक्यत एव। एकत्वाश्रयस्य कथमनेकत्वमिति चेत्। स्वयमेकस्यापि पदार्थान्तरेण द्वित्वाद्युपपत्तेः। तथाच प्रातिस्विकमेव द्वित्वादिकं सादृश्यादिवत्। इयांस्तु विशेषः। सादृश्यादिकं पदार्थान्तरनिरूपितंमेकप्रतिभान एकस्य प्राधान्येन प्रतीयते। द्वित्वादिकं तु नैकधर्मिप्रतीतौ पदार्थान्तरनिरूपितं प्राधान्येन प्रतीयते द्वित्वादे रूपादिवत् प्रतियोगिनिरपेक्षत्वात्[1]। किन्त्वनेकधर्मिस्वरूपं तद्गतं च द्वित्वादि समप्रधानभावेन परस्परसापेक्षं प्रतीयत इति। अतो न कश्चित् क्षुद्रोपद्रव इति।

एतेनैतदपि निरस्तम्। द्वयोर्भावो द्वित्वं नत्वेकस्य भावः, एवं त्रित्वादिकमपि, तथा च कथं द्वित्वादेः प्रातिस्विकत्वमिति। द्वयोर्भावो हि द्वित्वमित्यादौ भावादिशब्देन धर्मसमुदायस्यैव स्वीकृतत्वात्।अन्यथा घटानां भाव इत्यादौ भावादिशब्देन घटत्वसमुदायग्रहणेन घटत्वस्यापि प्रातिस्विकत्वविरोधः परिहरणीयः। स च विरोधपरिहारः प्रकृतेऽपि सम इति।

द्वित्वादेर्घटत्वादिवत् प्रातिस्विकत्वे तद्वदेकभानेऽपि प्रतीत्यभावो न स्यादिति तु दत्तोत्तरम्। नरत्वादिवद् द्वित्वादेः प्रातिस्विकत्वेऽपि नैकधर्मिप्रतीतौ प्रतीतिः। अपि तु समप्रधानभावापन्नपदार्थान्तरगतद्वित्वादिसाहित्येनैव प्रतीतिरित्यत्र किं निमित्तमिति चेत्। द्वित्वादिस्वभाव एवेति ब्रूमः। नहि सर्वभावैरेकविधैर्भाव्यमिति नियमोऽस्ति। कुत एवं कल्प्यत इति चेत्। अन्यथा बाधकसद्भावादेवेति ब्रूमः। तथाहि।

यदि द्वित्वाद्यनेकत्वसंख्या अनेकधर्मस्तर्हि भावाभावद्वित्वमपि तथा स्यात्। स्यादेवेति चेन्न। तथात्वे तद्धर्मस्य द्वित्वादेर्भावरूपत्वमभावरूपत्वं चापद्येत। नच

[1]*प्रातिस्विकत्ववादिष्वप्यभिप्रायभेदो वर्तते। केचन द्वित्वादेः सप्रतियोगिकत्वमभ्युपगच्छन्ति। केचन नाभ्युपयन्ति च।*

तत् सम्भवति। अतस्तत्रैकस्यैव द्वित्वस्योभयरूपत्वानुपपत्तावन्यत्रापि तथात्वमेवेति।

नन्विदमेकमिदमेकमिमौ द्वावित्यपेक्षाबुद्धिजन्यस्य तन्नाशनाश्यस्य च द्वित्वादेः कथं प्रातिस्विकत्वमितिचेत्। न। अपेक्षाबुद्धिजन्यस्य तन्नाशनाश्यस्य च द्वित्वादेः प्रातिस्विकत्वे बाधकाभावात्। अपेक्षाबुद्धिजन्यत्वस्यैवासिद्धेश्च। अवश्यं चैतदेवम्। एको घटो यथा यावत् स्वसत्त्वमेक एव न कदाचिद् द्वौ तथा द्वावपि घटौ सर्वदा द्वावेवेति प्रतीतिव्यवहाराभ्यां यावद्धर्मिसत्वं द्वित्वादेरपि सत्वावधारणात्। अपेक्षाबुद्धिस्तु तद्व्यञ्जिकैव। तदपि क्वचिदेवेति वक्ष्यामः।

किञ्चापेक्षाबुध्दिजन्यत्वं प्रत्यक्षस्थल एवोतान्यत्रापि? नाद्यः। प्रत्यक्षतदितरप्रमाणयोः समानविषये वैलक्षण्यकल्पनानुपपत्तेः। तथाहि। प्रत्यक्षेण द्वाविति दृष्टावेव घटपटौ वाक्येनापि द्वाविति चोच्येते। तत्र प्रत्यक्षसिद्धमेव द्वित्वं वाक्येन बोध्यते। अन्यथा प्रत्यक्षागमयोः समानविषयत्वानुपपत्तेः। नच सादृश्यात् समानविषयत्वमिति वाच्यम्। द्वा सुपर्णा सयुजा, चत्वारि शृङ्गेति वैदिकैः, नद्यास्तीरे पञ्चफलानि सन्तीत्यादिलौकिकवाक्यैश्च द्वित्वादिबोधनेऽपेक्षाबुध्देरदर्शनात्। द्वौ पञ्चेत्यादिपदैर्द्वित्वादिप्रतीतेर्घटादिपदैर्घटत्वादिबोधवदपेक्षाबुद्धिनैरपेक्ष्येणानुभवसिद्धत्वात्। एवमनुमानेनाप्यपेक्षाबुद्धिनैरपेक्ष्येण द्वित्वाद्यनेकत्वसंख्या बोध्यते। आगमानुमानाभ्यां द्वित्वादिबोधनेऽपेक्षाबुध्देरभावेन कारणत्वाभावनिश्चयात्। शाब्दानुमितिसामग्य्रप्रवेशाच्च। तथाच यथा आगमेनानुमानेन च सिद्धमेव द्वित्वादिकं बोध्यते तथा प्रत्यक्षस्थलेऽपि सिद्धस्यैव द्वित्वादेर्बोधनम्, न तु दृष्टिसृष्टिपक्ष इव तात्कालिकस्येत्यंगीकार्यम्। परस्परसंवादित्वात्। अपेक्षाबुद्धिस्तु प्रत्यक्षस्थले व्यञ्जिकैव।

किञ्च एकदैव द्वाभ्यां यज्ञदत्तदेवदत्ताभ्यां घटपटौ द्वाविति यदा दृश्यते तदा

द्वित्वादेरिति पक्षे एष्यद्घटोत्पत्तिपर्यन्तं द्वित्वादेरवस्थानानुपपत्त्या तत्सम्बन्धा- नुपपत्तिश्च। किञ्चैकस्मिन् वर्तमाने भाविनि च प्रतीयमानं द्वित्वं वर्तमान- मात्रोपादानकं तस्मिन्नष्टे स्वयं नश्यतीति कथमेष्यद्धर्मत्वं तस्य सम्भवेत्।

ननु मया सदसती द्वे इति प्रतीतं द्वित्वमत्यन्तासत्यंगीकर्तुमनुचितमिति सत्येवांगीक्रियते। तद्द्वित्वस्यासत्सम्बन्धित्वं त्वौपचारिकमिति च। तथा भाविनि नष्टे वर्तमाने च प्रतीयमानं द्वित्वाद्यनेकत्वं बाधकवशाद् वर्तमानमात्रनिष्ठमंगीक्रियते। यत्र तु द्वित्वादिसम्बन्धिनः सर्वस्यापि सत्वं तत्र व्यासज्यवृत्तित्वमंगीक्रियत इति चेत्। न। प्रातिस्विकत्वस्वीकारेणैव सर्वसामञ्जस्योपपत्तावर्धजरतीयानुपपत्त्या एवंकल्पनस्याप्रामाणिकत्वात्।

किञ्च जीवेश्वरौ जडेश्वराविति प्रतीयमानं द्वित्वमेकैकमेवापेक्षाबुद्धिजन्यं व्यासज्यवृत्तीत्यंगीकारे तद्द्वित्वस्योपादानं किमिति वाच्यम्। उभयमिति चेत् तर्हि जीववदीश्वरस्यापि विकारापत्तिः। नचेश्वरे विकारोंगीकर्तुमुचितः। निर्विकारत्वश्रुतिव्याकोपात्। "भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भवः" इत्युक्तप्रकारेणेश्वरस्यापि दोषित्वापत्तेश्च। नचेश्वरस्य विकारानुपपत्त्या जीवमात्रोपादानकं द्वित्वादिकमिति वाच्यम्। तथात्वे तद्द्वित्वादेर्जीव-मात्रधर्मत्वापत्त्या व्यासज्यवृत्तित्वानुपपत्तेः। नह्यन्योपादानकस्यान्यधर्मत्वं युक्तम्। अतिप्रसङ्गात्। "द्वावेतौ नित्यमुक्तौ" इत्यादौ प्रतीतस्येशलक्ष्म।-द्वित्वस्यान्यतरोपादानत्वस्यापि वक्तुमशक्यत्वात्। उभयोरपि श्रुत्या[illegible]ा निर्विकारत्वेन प्रमितत्वात्। तथाच तद्द्वित्वस्य तदुभयोपादानकत्वानुपप-त्तावन्योपादानकत्वाप्रसक्तेश्चापेक्षाबुद्धिजन्यत्वानुपपत्त्या तद्व्यंग्यत्वस्यैवा-कामेनाप्यंगीकार्यत्वेनान्यत्रापि तथात्वमेवोचितमिति।

ननु प्रत्यक्षस्थल इव शाब्दादावपि द्वित्वमपेक्षाबुद्धिजन्यं तद्व्यङ्ग्यं वा कुतो

[1]*अस्पष्ट मिदं वाक्यम्।*

नांगीक्रियत इति चेन्न। तदनुभवाभावात्। अपेक्षाबुद्धिकारणत्वाभावाच्च। अपेक्षाबुद्धेः शाब्दानुमितिसामग्र्यप्रवेशाच्च। तथाहि। द्वौ पटौ कपिञ्जलास्त्रयः इत्यादिरूपो हि शब्दो द्वित्वाद्यनेकत्वसंख्याबोधकः। तत्र च शुक्लो घट इत्यदाविव सिद्धमेव द्वित्वादिकं संसर्गमर्यादया प्रतीयते। द्वौ त्रयश्चत्वार इति व्यवहाराच्च। द्व्येकयोर्द्विवचनैकवचने इत्यादि व्याकरणबलाच्च। गृहीतसङ्गतिकं पुरुषं प्रति प्रयुक्तो द्वावित्यादिशब्दस्तदर्थं स्मारयति। एवंच घटत्वादिसामानाधिकरण्येन द्वित्वादिरूपं वाक्यार्थं संसर्गमर्यादया प्रत्येति। एवं शाब्दे द्वित्वादिबोधे द्वित्वादेरपेक्षाबुद्धिजन्यत्वे का प्रत्याशा ? भवानपि चक्षुषी निमील्य परिभावयतु।

एवमानुमानिकप्रतीतावपि विरुद्धधर्माधिकरणत्वादेर्हेतोरनकेत्वसंख्यया भूयःसहचारे दृष्टे उपाध्यभावनिर्णये च तत्सहकृतेन प्रत्यक्षादिना व्याप्तौ प्रमितायां क्वचिद् विरुद्धधर्माधिकरणत्वादिलिङ्गदर्शनेनोद्बुद्धसंस्कारस्य व्याप्तिस्मृतौ पुनस्तद्व्याप्तिमल्लिङ्गानुसन्धानवतः तद्व्यापकानुमितिर्जायते। एवं च धूमानुमानस्थले यथा सिद्धस्यैव बह्न्यादेरनुमितिस्तथा द्वित्वाद्य-नेकत्वस्य पूर्वसिद्धस्यैवानुमितिरनुभवसिद्धा। नापेक्षाबुद्धिजन्यस्य तात्कालिकस्य। उक्तं ह्युपासनापादे सुधायाम् 'असंशयेन तत्वस्य निर्णये ब्रह्मदर्शनम्' इत्येतद्व्याख्यानावसरे 'अन्ये पुनर्मन्यन्ते' इत्यादिना श्रवणमेव ब्रह्मापरोक्षसाधनमिति मायिमतमनूद्य "यत् तावदुक्तं दशमस्त्वमसीति वाक्यादपरोक्षज्ञानजन्मोपलब्धमिति। तदसङ्गतम्। दशमत्वसंख्या खल्वपेक्षा-बुद्धिजन्या तद्व्यंग्या वेत्यतो नापाततो रूपादिकमिव प्रत्यक्षेणोपलभ्यते। ततो दशानां पूरणो दशमोऽसीति तथेति।" अतस्तद्व्यंग्यावेत्युक्त्या नापेक्षाबुद्धिजन्यमिति, नापाततो रूपादिकमिव प्रत्यक्षेणोपलभ्यत इत्युक्त्या च प्रत्यक्षस्थल एवापेक्षाबुद्धेरुपयोग इति च ज्ञायत इति।

भगवद्गतद्वित्वादेरनेकधर्मत्वे एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किञ्चन,

एवं धर्मान् पृथक् पश्यन्नित्यादिश्रुतिव्याकोपापाताच्च । नचैतच्छ्रुतेर्द्वित्वादिव्यतिरिक्तविषयत्वमिति वाच्यम् । बाधकाभावात् । 'समुदायस्तु भिन्नगः ' इति स्ववाक्यं 'न केनचिदभेदोऽस्ति भेदाभेदोऽपि वा क्वचित् । समुदायमृते विष्णोः स्वगुणादीन् विनापि वा' इतिश्रुतिवाक्यं चान्यार्थम्। सुधा तु तत्वस्यातिगोप्यत्वाभिप्रायेण प्रातीतिकार्थमपेक्ष्य प्रवृत्तेति।

किञ्च द्वित्वादेरनेकधर्मत्वे भगवद्गतद्वित्वादेस्तद्गतधर्मान्तरवत् पूर्णत्वस्य श्रुत्यादिप्रमितस्याभावः स्यात् । नहि पूर्णस्य भगवद्धर्मस्य पूर्णान्यधर्मता सम्भवति। तथात्वे अपूर्णताया अपि प्राप्तेः। न च विरुद्धं पूर्णत्वमपूर्णत्वं चैकत्र सम्भवति । ननु भगवद्धर्माणां द्वित्वादिव्यतिरिक्तानामेव पूर्णत्वाभ्युपगमात् नानुपपत्तरिति चेन्न । निर्बाधं भगवद्धर्ममात्रे प्रतीतस्य पूर्णत्वस्य सङ्कोचे मानाभावेनैतत्कल्पनस्यानादरणीयत्वात्। बाधकस्य च परिहृतत्वात्।

'अभिन्नो भगवान् स्वेन तदन्येन विभेदवान्', 'नित्या धर्मस्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः 'इत्यादिवाक्यात् नास्मदुक्तिक्षतिः काचित्। किन्त्वन्यपक्षे बहुव्याकोपः स्यान्न संशयः।

तस्माद् द्वित्वादिभिः सर्वैर्ज्ञानानन्दादिभिस्तथा ।
अभिन्नो भगवान् दोषाभावरूपगुणैरपि ॥

इति श्रीमुष्णवासुदेवाचार्य शिष्यवासुदेवाचार्यकृतः

द्वित्वविचारः समाप्तिमजङ्गमीत्

श्रीकृष्णार्पणमस्तु

द्वित्वचिन्तामणिः

श्रीमुष्णवासुदेवाचार्यदौहित्रगोपालकृष्णाचार्यकृतः

अथ श्रीमुष्णवासुदेवाचार्य दौहित्र गोपालकृष्णाचार्यविरचितः

द्वित्वचिन्तामणिः

श्रीगुरुभ्यो नमः।

व्यासं मध्वं जयार्यं च नृसिंहार्यगुरुं तथा।
वासुदेवगुरुं नत्वा क्रियते द्वित्वचिन्तना ॥ १॥

श्रीवासुदेववर्याणां दौहित्रस्तत्कृपाबलात्।
गोपालकृष्णः कुरुते द्वित्वचिन्तामणिं सुधीः ॥ २॥

कथं नु कुर्यादयमल्पबोध इति स्म चिन्ता भवतां हृदि स्यात्।
व्यासप्रसादादसताऽपि तुल्यः कीटोऽपि भेजे किल राजभावम् ॥३॥

बद्ध्वा मस्तकमण्डले करयुगं स्थित्वा च युष्मत्पुरो
दासोऽहं व इतीरयंश्च वचसा वः प्रार्थये सज्जनाः।
युष्माभिः परिहासकारणकृतेऽप्येषा दृशा वीक्षिता
भूयाद् यद्ययमद्य तर्हि सफलो जायेत यो मे श्रमः ॥ ४॥

इह खलु भगवत्पादैः 'भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि', 'नरत्वादिकमप्येवंतत्तद्धर्मतयेष्यते। न सर्वधर्म एकोऽस्ति समुदायस्तु भिन्नगः' इत्यादिनाऽनेकत्वव्यतिरिक्तधर्माणां प्रतिनियतत्वमनेकत्वसंख्यायास्तु व्यासज्यवृत्तित्वमभिहितमित्यनुव्याख्यनसुधाभिप्रायं मन्वानो द्वित्वं व्यासज्यवृत्त्येवेति लोको मन्यते। श्रीमद्भगवत्पादीयशास्त्रसुधाजलधितरङ्गा-वगाहसुखितमानसहंसा अनेकपरमहंसकुलाचार्या आर्याचार्यास्तु अनुव्याख्यानस्य तद्व्याख्यानानां सन्न्यायरत्नावलीनयचन्द्रिकान्यायसुधानां च

निगूढमभिप्रायतत्वं सम्यगवबुध्य द्वित्वमपि प्रतिनियतमेवेति तत्वरहस्यमाप्तशिष्येभ्यो रहस्युपादिशन् । तच्च यद्यप्यस्माभिर्न प्रकाश्य लेखनीयं तथाप्यार्याचार्याणां शिष्यप्रशिष्यातिशयं तत्प्रकाशितसम्प्रदायैः शिष्यस्य कीर्तनं तदीयपुत्रपौत्राणां चात्यन्तमाहात्म्यं चासहमानैः कैश्चिदाधुनिकैरुत्प्रेक्षितानां दूषणाभासानामुद्धारार्थमयं द्वित्वचिन्तामणिर्नाम ग्रन्थो मया लिख्यते ॥

इत्थं हि ते दूषणमाहुः ॥

द्वित्वं प्रातिस्विकं चेद् भवति भवतु तर्ह्येकदृष्टचैव दृष्टं
धर्मिप्रत्यक्षमेकं सकलसुजनमतं प्रत्यये तस्य हेतुः ।
क्लृप्तादन्योऽपि हेतुर्यदि पुनरधुना कल्प्यते कल्पना स्यात्
हेतुः सम्बन्धिवस्तुस्मृतिरिह भविता लोकदृष्टोपमा चेत् ।

यदि द्वित्वं प्रातिस्विकं स्यादेकत्वमिव प्रत्येकं पर्याप्तं स्यात् तर्हि एकत्ववदेकस्मिन् दृष्टे द्वित्वमपि प्रत्यक्षं स्यात्, द्वाविति प्रत्यक्षापत्तिः । द्वित्वप्रत्यक्षकारणस्य धर्मिप्रत्यक्षस्य विद्यमानत्वात् । संख्याप्रत्यक्षात्वावच्छेदेन धर्मिप्रत्यक्षस्यैककारणत्वेन कारणान्तरानपेक्षणात् । अपेक्ष्यमाणस्यापि प्रत्यक्षान्तरस्य केनाकारेण कारणत्वम् ? धर्मिप्रत्यक्षत्वेन वा ? प्रतियोगिप्रत्यक्षत्वेन वा ? नाद्यः । पदार्थान्तरस्यापाद्यमानप्रत्यक्षविषयद्वित्वं प्रति धर्मित्वविवादपर्यवसानात् । द्वित्वान्तरं प्रति धर्मित्वस्य प्रकृतानुपयुक्तत्वात् । न द्वितीयः । क्वापि प्रतियोगिप्रत्यक्षस्याकारणत्वेनादृष्टकल्पनापातात् । ससम्बन्धिकपदार्थप्रत्यक्षे प्रतियोगिप्रत्यक्षस्य कारणत्वे किं कार्यतावच्छेदकं द्वित्वप्रत्यक्षत्वं वा ? संख्याप्रत्यक्षत्वं वा ? एकत्वभिन्नसंख्याप्रत्यक्षत्वं वा ? सप्रतियोगिकप्रत्यक्षत्वं वा ? नाद्यः । त्रित्वादिप्रत्यक्षे कार्यतावच्छेदकान्तरकल्पनापातात् । न द्वितीयः । एकत्वप्रत्यक्षेऽतिप्रसङ्गात् । न तृतीयः । संयोगादिप्रत्यक्षे कार्यतावच्छेकान्तरकल्पनाप्रसङ्गात् । नान्त्यः । भेदसादृश्यादिप्रत्यक्षेऽपि प्रतियोगिप्रत्यक्षस्य कारणत्वापातात् । अथ अत एवानेकत्वसंयोगविभागान्यतमप्रत्यक्षत्वं कार्यतावच्छेदकमिति चेन्न । अन्यतमत्वस्य गौरवेणानवच्छेदकत्वात् । वस्तुतस्तु अन्यतमत्वस्यावच्छेदकत्वेऽपि यद्विशेषयोरिति न्यायेन सप्रतियोगिकप्रत्यक्षत्वं कार्यतावच्छेदकं स्यादेवेति पूर्वोक्तदोषस्य न निस्तारः ।

[1]अपि च 'द्वित्वादिकमेकमेव । लाघवात् । न पुनः प्रतिव्यक्ति भिन्नभिन्नम् । गौरवात्' इति यो वादी वदति तं प्रति पुनः कार्यकारणभावान्तरमन्यत्रादृष्टमेव कल्प्यते चेत् महासाहसवादी पुनर्गौरवप्रतिपादनेन तवैव पराजयं कुर्यादिति महती प्रतिकूलता ।

अङ्गीकृतेऽपि द्वित्वस्य भेदसादृश्यादितौल्ये प्रतियोगिस्मरणमात्रं कारणं स्यात् । ततश्च घटान्तरस्मृतिमतः एकमात्रघटप्रत्यक्षे सति द्वित्वप्रत्यक्षं स्यात् । तस्मान्न प्रतिनियतं द्वित्वमिति ॥

अत्र केचित्- [2]एकत्वद्वयपर्याप्त्यधिकरणपदार्थप्रत्यक्षं द्वित्वप्रत्यक्षे कारणमिति व्यासज्यवृत्तिद्वित्ववादिनामपि सम्मतम् । तच्चैकमात्रदर्शनस्थले नास्तीति न द्वित्वप्रत्यक्षमिति समादधते ।

तन्न । एकत्वद्वयमित्यादेर्हि एकत्वयोर्द्वयं द्वित्वं तत्पर्याप्त्यधिकरणं यत् तत्प्रत्यक्षमित्यर्थः[3] । तच्चैकदर्शनस्थलेऽपि वर्तते एव । एकत्वान्तरनिरूपितद्वित्वपर्याप्त्यधिकरणैकत्वरूपपदार्थप्रत्यक्षस्य प्रकृतेऽपि सत्वात् । किञ्च द्वित्वस्य प्रातिस्विकत्वे एकत्वद्वयमप्येकत्रैव स्यात् । द्वित्वस्यैकत्वद्वयव्याप्तत्वेन तत्सत्वे तदवश्यंभावात् ।

---

[1] इदं वाक्यमस्पष्टम् । [2] अत्र पर्याप्तिनिवेशश्चिन्त्यः ।
[3] द्वयद्वित्वद्वितीयशब्दानां पर्यायत्वं स्वीकृत्यैवमभिधानं न स्वरसमिति भाति । एकत्वयोर्द्वित्वस्य पर्याप्तिस्तयोरेव वर्तते । एकत्वद्वयं तु धर्मिणि । अतः संख्याप्रत्यक्षस्य धर्मिप्रत्यक्षं कारणमित्युपपादनसमये एकत्वयोर्द्वित्वपर्याप्तिवचनं न युक्तमिति भाति ।

अन्ये तु द्वित्वान्तरसहितमेव द्वित्वं प्रत्यक्षं न पुनरेकमेवेति नैकदर्शनमात्रेण द्वित्वप्रत्यक्षमिति वदन्ति। तन्न। प्रतिवादिनो द्वित्वान्तरस्यासिध्दतया अलौकिककल्पनापातात्। एकत्वमप्येकत्वान्तरसहितमेव प्रत्यक्षमित्यापातात्। किञ्च द्वित्वान्तरसाहित्यं नाम किं द्वित्वान्तर सामानाधिकरण्यं वा ? द्वित्वान्तरेण सहैकबुद्धिविषयत्वं वा ? द्वित्वान्तरविशेषणकत्वं वा ? समूहालम्बनस्थल इवस्वरूपसम्बन्धविशेषो वा ? नाद्यः। अनङ्गीकारात्। न द्वितीयः। बुद्धिशब्देन कार्यबुद्धिविवक्षायामात्माश्रयात्। बुध्यन्तरविवक्षायामनवस्थानात्। न तृतीयः। द्वाविमावित्यादौ द्वित्वयोः परस्पर विशेषणविशेष्यभावाननुभवात्। नापि चतुर्थः। तद्वदेव क्वचित्तदसिद्धे र्हि तस्यापि प्रत्यक्षत्वप्रसङ्गात्[1]। नह्येकमन्येन सहितमेव प्रत्यक्षमिति नियमः क्वापि दृष्टोऽस्ति। अपिच द्वित्वान्तरशब्देन किं सर्वमेव द्वित्वं विवक्षितं किंवा यत्किञ्चिदनियतमेकं आहोस्विन्नियतमेकम् ? नाद्यः। तथासति द्वित्वप्रत्यक्षं सकलजगत्प्रत्यक्षाधीनमित्यापातात्[2]। न द्वितीयः। अपेक्ष्यतावच्छेदकं विना अनियतयत्किञ्चिदपेक्षणानुपपत्तेः। अत एव न तृतीयः। न च द्वित्वस्य द्वित्वान्तरं व्यञ्जकम्। संख्यायाः संख्यान्तरव्यञ्जकत्वस्य क्वाप्यनुपलब्धत्वेनादृष्टकल्पनापातात्। अपि चान्योन्यव्यञ्जकत्वाङ्गीकारे परस्परं द्वित्वबुद्ध्योः परस्परद्वित्वबुद्धिकार्यत्वापातेनान्योन्याश्रयः स्यादिति।

अपरे तु एकत्वद्वयमेव द्वित्वं न संख्यान्तरम्। 'दशैव मूलसंख्या तु तद्विभेदाः शतादयः' इत्युक्तन्यायात्। ततश्च नोक्तदोष इत्याहुः।

तदेतत् स्वव्याहतम्। एकत्वमेव संख्या चेत् तर्हि द्वित्वं नाम किं एकत्वसमुदाय एव किं वा एकत्वद्वयम् ? नाद्यः। द्वित्वत्रित्वयोर्भेदाभावप्रसङ्गात्। न चाल्पतमैकत्वस्य समुदायो द्वित्वम्, अल्पतरैकत्वसमुदायस्त्रित्वम्,

[1] अस्य वाक्यस्यार्थो न ज्ञायते।
[2] घटपटगतद्वित्वप्रत्यक्षे सकलजगत्प्रत्यक्षं स्यादित्यापादनं स्वरसम्।

अल्पैकत्वसमुदायः चतुष्टमित्यादिरुपेण त्रित्वादीनां परस्परं भेद इति वाच्यम्। पञ्चकादिभेदासम्भवात्[1]। एकत्वातिरिक्तसंख्याभावे तमवाद्यर्थस्यैव वक्तुमशक्यत्वात्। न द्वितीयः। एकत्वद्वयमित्यत्र द्वयशब्दस्य द्वित्वार्थकतया[2] स्वव्याधातात्। किञ्च 'दशैव मूलसंख्या तु' इति प्रमाणबाधः स्फुट एव। अपि च समुदायः समुदायिभिन्नोऽभिन्नो भिन्नाभिन्नो वा। नाद्यः। अतिरिक्तद्वित्वसंख्यापत्त्या स्वव्यघातात्। न द्वितीयः। प्रत्यैकत्वस्यापि[3] द्वित्वरूपत्वापत्त्या एकदर्शनेनापि द्वित्वप्रत्यक्षापातात्। नापि तृतीयः। तथापि द्वित्वस्यातिरिक्तत्वापातादित्यलम्।

तस्माद् द्वित्वस्य प्रत्येकपर्याप्तावेकदर्शनेनापि द्वित्वप्रत्यक्षापत्तिरिति युक्तम्।

किञ्चैकत्रैव द्वित्वपर्याप्त्यङ्गीकारे एकत्वद्वित्वादीनामत्यन्तसामानाधिकरण्यापत्त्या शतेन पञ्चाशदनुमानवत् पञ्चाशता शतानुमानमपि स्यात्। अपि च पदार्थद्वये प्रत्येकं द्वित्वस्य सत्वे द्वयोर्द्वाविति प्रतीतिवत् चत्वार इत्यपि प्रतीतिप्रसङ्गः। द्वित्वद्वयस्य चतुष्टरूपत्वात्।

अपिच एकैकत्र स्थितस्य परापेक्षया प्रतीत्या एकमात्रदर्शनेनाप्रतीतावपि वस्तुतः एकस्मिन्नेकत्ववत् द्वित्वस्यापि विद्यमानतया द्वावित्यादिप्रयोगस्य द्वैकयोरित्यादिशास्त्राविरुद्धतया साधुत्वापत्तिः। किञ्चैकस्मिन् एकत्ववत् परार्धान्तसंख्याया अपि सत्वात् परब्रह्मण इव जीवानामप्यनन्तगुणत्वापत्तिः। जीवानां परस्परं तारतम्यं च न स्यात्। बाधकाभावात्[4]। किञ्च द्वित्वस्य प्रत्येकपर्याप्त्यभ्युपगमो व्यर्थः। नच सुधोक्तरीत्या व्यासज्यवृत्तित्वाङ्गीकारे द्वित्वस्योभाभ्यां धर्मिभ्यां भिन्नाभिन्नत्वांगीकारे धर्मिणोरपि भेदाभेदप्रसङ्गः। यद् यदभिन्नाभिन्नं तत् तदभिन्नमिति व्याप्तेरिति वाच्यम्। अत्यन्ताभेदस्थल एव

[1] पञ्चत्वादिभेदासम्भवादिति पाठ आशास्यते। [2] द्वित्ववदर्थकतयेति स्यात्।
[3] एकैकैकत्वस्यापीत्यर्थः। [4] साधकाभावादिति स्यात्। गुणतारतम्यं हि जीवतारतम्यसाधकम्।

तादृशव्याप्तेरङ्गीकारेण भेदाभेदे तदभावात् । यथोक्तं सुधायाम्-"सा चापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः" इति। अन्यथा पटेन भिन्नाभिन्नस्यैकस्य तन्तोस्तन्त्वन्तरेण भेदाभेदापत्तिः।

नन्वथापि द्वित्वं प्रातिस्विकमेवाङ्गीकार्यम् । अन्यथा जीवेश्वरद्वित्वस्य जीवेश्वराभ्यां भेदाभेदप्रसङ्गः । ततश्च द्वित्वविनाशोत्पत्तिभ्यामीश्वर-स्याप्युत्पत्तिविनाशौ स्याताम् । 'भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भवः' इत्यनुव्याख्यानोक्तेः । ततश्च 'अतोऽशेषगुणोन्नद्धं निर्दोषं यावदेव हि तावदेवेश्वरो नाम तत्र भेदोऽपि न क्वचित्' इत्युक्तलक्षणेश्वरदुर्भिक्षापातः घटेश्वरद्वित्वस्य घटस्यानित्यत्वेन नित्यत्वासंभवाच्च । नहि द्वित्वं प्रतियोगित्वादिवद् धर्मिसत्तानिरपेक्षम् । ननु घटस्य विनाशेऽपि द्वित्वमीश्वरमात्रे वर्तते इति चेन्न ।तर्हि त्वयैव द्वित्वस्यैकमात्रवृत्तित्वाङ्गीकारे द्वित्ववादपर्यवसानापत्तिः । न द्वितीयः[1] । तथात्वे ईश्वरस्यापि द्वित्वं प्रत्युपादानत्वापत्त्या निर्विकारश्रुतिविरोधात् । घटमात्रोपादानकत्वे ईश्वरद्वित्वमिति[2] पारिभाषिकत्वापातात् । निरुपादानसृष्ट्यभ्युपगमे चालौकिककल्पनाप्रसङ्गात् । तथा च द्वित्वं प्रातिस्विकमेवांगीकार्यं यावद्धर्मिसत्वमनुवर्तमानं च। अतो न कश्चित् क्षुद्रोपद्रव इति चेन्न।

तत्र न तावदनित्यत्वापत्तिरित्याद्यो दोषः । भेदसहितस्याभेदस्य दोषोत्पादकत्वाभावात् । अन्यथा तन्तुपटयोर्भेदाभेदेन तन्तौ पटत्वं पटे तन्तुत्वमित्यव्यवस्था स्यात्। विशेषो व्यवस्थापक इत्यङ्गीकारे न तु प्रकृतेपि तथास्ति [3]। अत एव टीकायामुक्तम्- 'भेदेन सहितोऽभेदो न दोषमावहति' इति।

[1] कोयं द्वितीयपक्ष इति न ज्ञायते। लेखकप्रमादेन मध्ये कोऽपि ग्रन्थपातः स्यात्।
[2] घटेश्वरद्वित्वमितीति स्यात्।
[3] इत्यङ्गीकारे तु प्रकृतेऽपि तथास्तीति पाठः स्यात्।

अनुव्याख्यानं तु भेदाभेदाङ्गीकारे भयव्युत्पादनमात्रमिति यत्किञ्चिदेतत् [1] । यच्च द्वित्वं नित्यमनित्यं वेति विकल्प्य दूषणमुक्तं तत्र द्वित्वमनित्यमित्येव ब्रूमः। न चेश्वरस्यापि विकारित्वापत्तिः। धर्म्यात्मना विकारस्य दोषत्वेन धर्मात्मना विकारस्यादोषत्वात्। निर्विकारश्रुत्यादीनां च धर्म्यात्मना विकारनिषेधकत्वात् **इति प्राञ्चः** ।

नव्यास्तु घटेश्वरद्वित्वादिकमपि नित्यमेव । 'नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः' इत्यनुव्याख्यानोक्तेः । सुधायामपि 'तुशब्दोऽवधारणे । अस्मात् कारणादस्माद् भगवतः । द्वित्वादिसंख्याव्यतिरिक्ता इति शेषः' इति तस्यानुव्याख्यानस्य व्याख्यातत्वात्। अत्रह्यनुव्याख्याने 'नित्या धर्मास्तदीयास्तु सर्वे' इत्येकं वाक्यम्। 'अस्मान्नैव भेदिनः' इत्यपरं वाक्यम्। अत्रास्मान्नैव भेदिनः इति वाक्यस्थास्मादित्यस्य व्याख्यानानन्तरं द्वित्वादिसंख्याव्यतिरिक्ता इति शेषस्य कृतत्वात् तत्रैवान्वितं शेषपदमिति प्रतीयते। अन्यथा 'नित्या इति' इति प्रतीकग्रहणानन्तरमेव द्वित्वादिसंख्याव्यतिरिक्ता इति शेषः कर्तव्यः। तेन ज्ञायते द्वित्वादिसंख्यायां नित्यत्वमङ्गीकृतं भेदशून्यत्वं तु नांगीकृतमिति । ततोऽयमभिप्रायः सम्पन्नः । सर्वे भगवद्धर्मा भगवन्निरूपितभेदशून्याः नित्यत्वात् यावद्द्रव्यभावित्वात् सामान्यव्याप्त्या घटत्वादिवदित्यनुमाने प्रयुक्ते सति द्वित्वादिसंख्यायां व्यभिचारप्रसक्तौ द्वित्वादिभिन्नत्वे सति नित्यत्वादिति हेतुर्विवक्षितः । अतो द्वित्वादिसंख्यायां न व्यभिचार इति वक्तुं द्वित्वादिसंख्याव्यतिरिक्ताइति शेष इति सुधायां शेषपूरणं कृतमिति ।अन्यथा द्वित्वादिसंख्याव्यतिरिक्ता इति शेष एव न कर्तव्यः प्रयोजनान्तरादर्शनात् । तस्मान्नित्यैव द्वित्वादिसंख्येति । एवं च नित्यत्वे भेदाभेदे च प्रमाणप्रमिते धर्मिसत्तानिरपेक्षत्वं वा ईश्वरमात्रवृत्तित्वं वा घटवत् द्वित्वांशस्य विनाशो वा आवाभ्यां मिलित्वा कल्पनीय इति यत्किञ्चिदेवैतत्।

[1] अस्पष्टमिदं वाक्यम्।

अपिच द्वित्वस्य प्रतिनियतत्वे 'समुदायस्तु भिन्नगः' इत्यनुव्याख्यानविरोधः। तद्व्याख्यानावसरे सुधायां 'अनेकत्वसंख्या तावदनेकाश्रिता । एकैकस्मिन् द्वित्वादेः शङ्कितुमप्यशक्यत्वात् । न हि द्वित्वादिकमेकैकप्रतीतौ प्रतीयते । न च प्रतियोगिनिरूप्यम् । धर्मितयैव अनेकानामनुभवात् ।अतो धर्मत्वहेतो[1] स्तत्रानैकान्त्यमित्यत आह- **समुदायस्त्विति** । तथापि तदन्यत्वेन हेतुविशेषणादेव न दोष इति भावः[2] । समुदायोऽनेकत्वं भिन्नगोऽनेकाश्रितः । सत्यमनेकत्वसंख्याऽनेकाश्रिता । सा चापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः' इत्युक्तत्वात् । तथा "न केनचिदभेदोऽस्य भेदाभेदोऽपि वा क्वचित् । समुदायमृते विष्णोः स्वगुणादीन् विनापि वा " इत्यनुव्याख्यानविरोधोऽपि स्यात् । तद्व्याख्यानसुधायां "अपिशब्दो विकल्पार्थःसन् व्यवस्थितविकल्पः।समुदायमृते न केनचिद् भेदाभेदोऽस्ति । स्वगुणादीन् विना अभेदो नास्ति कश्चिदपीत्यन्वयः"[3] इत्युक्तत्वात् सुधाविरोधस्तु विस्फुट एव।

अपि चेकैकस्मिन् द्वित्वस्य पर्याप्तत्वे तस्मिन् द्वित्वशब्दः पारिभाषिक एव स्यात् । एकैकस्मिन् द्वित्वाव्यवहारात् । प्रत्यक्षाभावाच्च । प्रमाणस्य च कस्याप्यभावात्।

तस्मात् सुधानुव्याख्यानादिविरोधमंगीकृत्य द्वित्वस्य प्रत्येकपर्याप्त्यभ्युपगमः केषाञ्चित् केवलं साहसमेव प्रकटयतीति।

इत्थं च नैव परकीयकृतिव्यपेक्षा
मुत्प्रेक्षयैव[4] रचितो दृढपूर्वपक्षः ।
गुर्वङ्घ्रिवारिजयुगस्मरणानुभावात्

---

[1] *नरत्वादिकं नानेकानुवृत्तं धर्मत्वाद् रूपादिवदित्यत्रेत्यर्थः।*
[2] *मुद्रितसुधापुस्तकेषु तथापीत्यादिवाक्यं संख्याऽनेकाश्रिता इति वाक्यस्यानन्तरं दृश्यते। अस्य ग्रन्थकर्तृ रीत्या अयं पाठः स्यात्।* [3] *'अभेदो नास्तीति। केनचिदपीत्यन्वयः' इति मुद्रितपुस्तकेषु सुधापाठः।*
[4] *परकीयकृतिव्यपेक्षा सूत्प्रेक्षयैवेति पाठः समादर्तव्यः। यथाश्रुतेऽनन्वयात्। मम परकीयकृत्यपेक्षा नास्ति, उत्प्रेक्षयैवायं दृढपूर्वपक्षो रचित इति ह्यर्थः।*

सिद्धान्तमप्यखिलसम्मतमाशु कुर्मः ।
श्रीवासुदेवगुरुवर्यपरागरेणो-
रीषत्सकृत्स्मरणमप्यखिलार्थहेतुः ॥

द्वित्वे व्यासक्तेऽपि स्यादेकस्यापि दर्शने दृष्टिः ।
पर्याप्तिः कारणता यस्मादन्यत्र नैव क्लृप्ताऽस्ति ॥

द्वित्वस्य प्रत्येकपर्यात्पत्वे एकैकस्मिन् दृष्टेऽपि द्वित्वप्रत्यक्षापत्तिरिति यदुक्तं तेत् तावदसङ्गतम् । द्वित्वस्य व्यासज्यवृत्तित्वेऽपि एकैकस्मिन्नपि विद्यमानतया एकैकस्मिन् दृष्टेऽपि प्रत्यक्षत्वापत्तिदूषणस्य त्वत्पक्षेऽपि साम्यात् । धर्मिप्रत्यक्षं हि धर्मप्रत्यक्षे कारणम्, न तु यावद्धर्मिप्रत्यक्षं कारणमन्यत्राक्लृप्तत्वात् । द्वित्वमात्रे यावद्धर्मिप्रत्यक्षकारणतायामदृष्टकल्पनापातात्[1] ।

प्रतियोगिप्रत्यक्षस्यान्यत्राक्लृप्तस्यापि द्वित्वप्रत्यक्षे कारणत्वमित्यस्मत्पक्षे दोषाभावाच्च[2] । तथाचान्यत्राक्लृप्तकारणताकल्पनासाम्यात् प्रतियोगिप्रत्यक्षं द्वित्वप्रत्यक्षे कारणमंगीक्रियते इति नैकदर्शनमात्रेण द्वित्वस्य प्रत्यक्षापातः। न च पर्याप्त्यधिकरणधर्मिप्रत्यक्षस्य कारणत्वे कारणतावच्छेदकशरीरे विशेषणप्रवेशमात्रं, प्रतियोगिप्रत्यक्षस्य कारणत्वे त्वक्लृप्तकारणस्य कारणताच्छेदकस्य च कल्पनाप्रसङ्ग इति वैषम्यमिति वाच्यं। अन्यत्र कारणत्वेन क्लृप्तप्रतियोगिज्ञाने प्रत्यक्षत्वमात्रप्रवेशेन कारणतावच्छेदकशरीरे प्रत्यक्षत्वधर्ममात्रप्रवेशात् । द्वित्वस्य सप्रतियोगिकत्वं तु अयमस्य द्वितीय इति

---

[1] *अनुभवबलात् सुधादिवाक्यबलाच्च कल्पनात् नायं दोषः।*
[2] *द्वित्वस्य सप्रतियोगिकत्वं तु प्रथमं साधनीयम्। 'न च प्रतियोगिनिरूप्यम्' इति सुधाविरोधात्।*

प्रतीतिव्यवहाराभ्यां सिद्धम् । द्वितीयसंख्यापूरकस्य[1] द्वित्वसंख्याप्रतियोगित्वरूपत्वात्[2] । किन्तु प्रतियोगिप्रत्यक्षस्य क्वाप्यकारणत्वे संयोगोऽप्येकस्मिन् दृष्टे प्रत्यक्षं स्यात् । पदार्थान्तरे तत्संयोगे च सत्येवान्यतरमात्रदर्शनदशायां संयोगस्य प्रत्यक्षत्वापादनात् । द्वित्वस्यापेक्षाबुद्धिजन्यत्वेनैकमात्रदर्शने सति द्वित्वस्याभावान्न प्रत्यक्षमिति प्रकृतेऽपि वक्तुं शक्यत एव । न चैवमीश्वरद्वित्व[3]मप्यनित्यं स्यादिति वाच्यम् । तन्मात्रस्य नित्यत्वाङ्गीकारात् । अन्यथेश्वररूपगुणानेकत्वसंख्यायास्त्वन्मतेऽपि नित्यत्वाङ्गीकारे वैरूप्यम् । अनित्यत्वाङ्गीकारे ईश्वरस्य सदा अनेकगुणवत्त्वमनेकरूपवत्त्वं च नास्तीत्यायातमिति त्वन्मतेऽपि उभयतःपाशारज्जुः स्यात् । अपि चेश्वरे राधासंयोगस्य नित्यत्वात् कृष्णे दृष्टे राधासंयुक्त इति गोपालानां प्रत्यक्षं स्यात् । न च राधाया असन्निधाने कृष्णे राधासंयोगः प्रत्यक्षः । तस्मात् प्रतियोगिप्रत्यक्षं संयोगप्रत्यक्षे हेतुरिति वक्तव्यम् । तथाच तद्वदेव द्वित्वप्रत्यक्षे प्रतियोगिप्रत्यक्षं कारणमिति कथमदृष्टकल्पनम् ? तस्मात् प्रतियोगिप्रत्यक्षस्य कारणत्वात् तदभावादन्यतरमात्रदर्शनेऽपि न द्वित्वप्रत्यक्षमिति युक्तमित्युत्पश्यामः ।

यच्च सप्रतियोगिकपदार्थप्रत्यक्षत्वं यद्विशेषयोरितिन्यायेन कार्यतावच्छेदकं स्यादित्यापादितं तद् भ्रान्तिविलसितम् । यदि च तादृशकार्यतावच्छेदककल्पने किमपि बाधकं नास्ति तर्ह्यस्तु तत् कार्यतावच्छेदकं का नो हानिः ? यदि किञ्चिदपि बाधकं स्यात् तदा बाधकाभावगर्भस्य प्रकृते प्रवृत्तिरेव न सम्भवति । [4]कार्यतावच्छेदकस्य सप्रतियोगिकपदार्थप्रत्यक्षत्वस्य सामान्यस्य लाभेऽपि कारणतावच्छेदकस्य प्रतियोगिप्रत्यक्षत्वस्य सामान्यत्वाभावात् । उभयोरपि सामान्याभावे एव तन्न्यायप्रवृत्तेः ।

यदपि चोक्तमन्यतमत्वं गौरवान्नावच्छेदकमिति । तन्न । अनतिप्रसक्तस्यैवा-

---

[1] *द्वित्वसंख्यापूरकस्येति स्यात् ।* [2] *'न च प्रतियोगिनिरूप्यम्' इति सुधायास्तर्हि का गतिः?*
[3] *ईश्वररूपद्वित्वमित्यर्थः ।* [4] *अस्पष्टमिदम् ।*

वच्छेदकत्वेन गौरवस्याकिञ्चित्करत्वात् ।

[1]यदपि चोक्तं प्रतीतिव्यवहारानाश्रित्य प्रवृत्तत्वात् प्रत्येकपर्याप्तं द्वित्वमिति वाङ्मात्रमिति । तन्न । द्वावित्यादिप्रतीतिव्यवहारयोरेव तद्विषयत्वेन सिद्धेः एकैकातीतव्यवहारानास्पदं वस्त्वेव न भवतीति संभवतीति । नित्यातीन्द्रियस्यावस्तुत्वापत्तेः । नापि प्रतीतिव्यवहाराजनकत्वम् । अलौकिकस्य प्रत्यक्षस्यानुमित्यादेर्वा विषयाजन्यत्वेन पूर्वोक्तदोषानिस्तारात् । अस्मदभिमतद्वित्वद्वयस्यापि प्रतीतिव्यवहारकारणत्वस्य वक्ष्यमाणत्वेनासिद्धेश्च ।

यद्वा धर्मिप्रत्यक्षमेव कारणं न प्रतीयोगिप्रत्यक्षं कारणम् । एकैकस्य द्वित्वस्याप्रत्यक्षत्वेन समुदितस्यैवप्रत्यक्षत्वेन समुदितस्य चोभयमपि धर्म्येवेति धर्मिप्रत्यक्षस्यैव कारणत्वात् । प्रतियोगिप्रत्यक्षत्वं विद्यमानमपि न कारणतावच्छेकम् । न चैकस्याप्रत्यक्षत्वे समुदायोऽप्यप्रत्यक्षं स्यादिति वाच्यम् । परमाणुपुञ्जवादिमते एकैकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समुदायप्रत्यक्षवदुपपत्तेः । एकस्य केशस्य दूरतोऽप्रत्यक्षत्वेऽपि तत्समुदायप्रत्यक्षत्वस्य सर्वसम्मतत्वाच्च । संयोगादिस्थले चैवमेव वक्तव्यत्वाच्चेति नानुपपत्तिः ।

एवं च द्वित्वं द्वित्वान्तरसहितमेव प्रतीयत इति मतं समाहितं भवति । नच द्वित्वान्तरमेवासिद्धमितिवाच्यम् । योहि द्वित्वान्तरमस्तीति अस्मद्वचनादवबुध्य कथं तर्ह्येकस्मिन् दृष्टेऽपि न दृश्यत इत्यनुयुङ्क्ते तं प्रत्येवमुक्तमिति उक्तदोषानवकाशात् ।

यस्तु द्वित्वद्वयमेव कथमित्यनुयुङ्क्ते तस्य सन्तोषमनेन प्रकारेण जनयामः । यर्हि द्वित्वं व्यासज्यवृत्तितर्ह्येकैकत्र किमेकदेशेन वर्तते किंवा कार्त्स्न्येन । नाद्यः । निरंशत्वात् । न द्वितीयः । अन्यस्मिन् तदभावप्रसङ्गात् । किञ्चोभयत्रैकस्यैवाश्रितत्वे मध्यप्रदेशेऽपि द्वित्वस्य विद्यमानत्वे कुण्डलद्वित्वस्य मुखेन

---

[1] *अस्पष्टोऽयं खण्डः ।*

सम्बन्धप्रसङ्गः । मध्यप्रदेशे द्वित्वाभावे एकस्यैव द्वित्वस्योभयाश्रितत्वानुपपत्तिरित्यादिदूषणेन व्यासज्यवृत्तित्वानुपपत्तौ संयोगादिवत् प्रतिनियतत्वस्यैव युक्तत्वात्। एवंप्रकारेणास्माभिः सन्तोषितोऽयं तूष्णीमेव स्यात्। अन्यथा सादृश्यादिकमपि कस्मादनेकमंगीकरोति ? उभयज्ञानाधीनज्ञानत्वं वा उभयप्रत्यक्षाधीनप्रत्यक्षत्वं वा द्वित्वस्योभयस्वरूपत्वे निमित्तम् ? आद्ये सादृश्यादीनामप्युभयस्वरूपत्वं स्यात् । द्वितीये संयोगादीनामप्युभयस्वरूपत्वप्रसङ्गः स्यात् । तस्मादुभयज्ञानाधीनज्ञानत्वं यथा न प्रयोजकं तथोभयप्रत्यक्षाधीनप्रत्यक्षत्वमप्यप्रयोजकमेवेति न द्वित्वस्योभयस्वरूपत्वं किन्तु प्रत्येकमेवोभयाश्रितं द्वित्वमङ्गीकार्यम्।

वस्तुतस्तु द्वित्वव्यासज्यवृत्तित्ववादिना यद् द्वित्वं[1] नामैकत्वातिरिक्तं प्रत्येकपर्यासमङ्गीक्रियते तदेवास्मन्मते द्वित्वम्। तस्यैकत्वात्मकत्वे प्रतियोगिनिरूप्यत्वानुपपत्तेः । द्वित्वात्मकत्वे प्रतिव्यक्तिपर्याप्त्ययोगात् । एवं च तद् द्वितीयत्वं यद्येकनेव प्रतीयते तदा तत्प्रत्यक्षं नोभयप्रत्यक्षाधीनं किन्त्वेकप्रत्यक्षाधीनं अपरज्ञानमात्राधीनं चायमस्य द्वितीय इत्याकारकमुत्पद्यते। यदि चोभयमपि प्रतीयेत तदा तत्पक्षे द्वाविमावित्याकारकमुभयधर्मिप्रत्यक्षाधीनं तत्प्रत्यक्षं जायते। तदेव द्वित्वप्रत्यक्षमित्युच्यते। एवं क्लृप्तधर्मस्यैव द्वित्वात्मकत्वोपपत्तावतिरिक्तद्वित्वांगीकारे महद् गौरवम् । अत एव द्वितीयत्वं द्वित्वसंख्यापूरकत्वमिति निरुक्तिमिच्छन्ति पण्डिताः[2] । द्वयोर्मेलनम् द्वित्वरूपत्वेनान्योन्यपूरकत्वात्।

न च द्वितीयत्वद्वयं वा द्वितीयत्वसमुदायो वा द्वित्वम् ? नाद्यः। द्वयशब्दस्य द्वित्वार्थकत्वेन स्वव्याघातात्। न द्वितीयः। त्रित्वादिभ्यो भेदाभावप्रसङ्गात् इति वाच्यम् । द्वितीयत्वसमुदाय एव द्वित्वम् । त्रित्वादिकं तृतीयत्वादि-

[1] *द्वितीयत्वमिति पाठः स्यात् । अन्यथा प्रकरणानानुगुण्यात् ।* [2] *ततश्च द्वितीयत्वं न द्वित्वरूपम् । एवं सति वस्तुतस्त्वित्यादिनोक्तं न सङ्गच्छते ।*

समुदायरूपमित्यङ्गीकारेण त्रित्वादिभेदोपपत्तेः । द्वितीयत्वद्वयमेव वा द्वित्वमस्तु । तत्र द्वयशब्देन द्वितीयत्ववृत्तिद्वितीयत्वसमुदायो विवक्षित इति स्वव्याघातः कुतः ? एतेन द्वित्वान्तरशब्देन सर्वमेव द्वित्वं वा विवक्षितं यत्किञ्चिद्वेत्यादिदोषाः पराहताः । इदं द्वितीयत्वं यद्द्वितीयत्वनिरूपितं तत्सहितमेव द्वित्वं प्रतीयत इत्यङ्गीकारेणोक्तदोषानवकाशात्।

नापि एकत्वद्वयमेव द्वित्वं न संख्यान्तरमित्युक्तावुक्तदोषोऽवकाशं लभते । एकत्वातिरिक्तद्वित्वांगीकारात् । एवमेव तृतीयत्वचतुर्थत्वादिकमपि[1] पृथक्पृथगेव । अत एव 'दशैव मूलसंख्या स्यात् तद्विभेदाः शतादयः' इति प्रमाणविरोधोऽपि नास्ति। न चैवं समुदायः समुदायिभ्यां भिन्नोऽभिन्नो वेत्यादिविकल्पदोषापत्तिः । परस्परनिरूप्ययोर्द्वित्वयोरेकसमूहालम्बनवुद्धेरेव द्वित्वबुद्धित्वांगीकारेण समुदायानपेक्षणात्[2] । परस्परनिरूप्यद्वित्वाधिकरणयोस्तद्द्वित्वप्रकारकसमूहालम्बनबुद्धेर्द्वित्वबुद्धित्वांगीकाराद्वा । एतेन एकत्वद्वयमेव द्वित्वमिति मतं च समाहितं भवति । तत्रैकत्वशब्दस्य एकत्वसमानाधिकरणद्वितीयत्वार्थकत्वांगीकारात्। एतेन एकत्वद्वयाधिकरणपदार्थप्रत्यक्षं द्वित्वप्रत्यक्षकारणमिति मतं च समाहितं भवति । व्यधिकरणैकत्वद्वयाधिकरणपदार्थप्रत्यक्षस्य द्वित्वप्रत्यक्षे कारणत्वांगीकारेणोक्तदोषानवकाशात् । यच्चास्मिन् पक्षे किञ्चेत्यादि दूषणान्तरमुक्तं तदपि स्वव्यहत्या परास्तम्[3]। किं तदनुमानमुतापादनम् ? नाद्यः। एकस्मिन्नधिकरणे एकत्वद्वयसाधने बाधोपपत्तेः । न द्वितीयः । व्यधिकरणैकत्वद्वयपर्याप्त्यधिकरणत्वं नाम स्वव्यधिकरणैकत्वनिरूपितद्वित्वपर्याप्त्यधिकरणैकत्वाधिकरणत्वम् । तच्च मया एकस्मिन्नेव वस्तुन्यंगीक्रियत एव । द्वित्वमात्रस्यैकपर्याप्तत्वेन एकत्वाधिकरणद्वित्वस्यापि तादृशत्वात् । यदि च स्वव्यधिकरणैकत्वसमानाधिकरणत्वं तत् तदा विरोधादेवैतन्न सङ्गतम्। यदिच

[1] *त्रित्वचतुष्ट्वादिकमपीति पाठेन भाव्यमिति भाति ।* [2] *इदं वाक्यमुत्तरवाक्यं चास्पष्टार्थम् ।*
[3] *किञ्चेत्यादिदूषणान्तराभिधानं किमिति न ज्ञायते ।*

अन्योन्यभिन्नैकत्वधिकरणत्वं तत् तदापि एकत्वस्य यावद्द्रव्यभावित्वेन धर्मिणाऽत्यन्ताभिन्नतया एकस्मिन्नधिकरणे विद्यमानयोरेकत्वयोः परस्पर-भिन्नत्वानुपपत्तेः तदप्ययुक्तमेव । **अत एकस्मिन्दृष्टे द्वित्वप्रत्यक्षं स्यादित्यापादनं मीलितनयनेन केनचित् कृतमित्युपेक्षितम् ।**

यच्चोक्तं पञ्चाशता शतानुमानं स्यादिति तदबोधविजृम्भितम् । संभवति शतेन पञ्चाशदनुमानम् । अनेकत्वसंख्यामात्रस्यापेक्षाबुद्धिजन्यत्वेन[1] व्यधिकर-णशतैकत्वावगाह्यपेक्षाबुद्धिजन्यस्य शतत्वस्य प्रत्यक्षकाले स्वोचितापेक्षाबुद्धि-जन्यस्य पञ्चाशत्वस्य विद्यमानत्वात् । पञ्चाशता शतानुमानं न सम्भवति । पञ्चाशत्वमात्रावगाहनकाले व्यधिकरणशतैकत्वावगाह्यपेक्षाबुद्ध्यभावेन पञ्चाशत्संख्याया अभावात्[2] । अपेक्षाबुद्धिव्यंग्यत्वेऽपि तदानीं तदभावात् । वस्तुतस्तु एकमात्रवृत्तिपञ्चाशात्संख्याया एकमात्रवृत्तिशतत्वानुमानं चेद् भवत्येव । एकमात्रवृत्तिशतत्वादेः शतत्वमात्रपर्यवसन्नतया[3] तादृशानुमाने बाधकाभावात् । प्रत्येकवृत्तिपञ्चाशत्संख्यया पूर्वोक्तमिलितपञ्चाशत्संख्यया मिलितशतत्वानुमानं चेद् व्यभिचार एव । मिलितशतपञ्चाशत्संख्याया मिलितसंख्याशून्ये विद्यमानत्वात्[4] ।

यदपि चोक्तं द्वयोश्चत्वार इति प्रतीत्यापत्तिरिति तदेतेनैव परास्तम् । व्यधिकरणैकत्वचतुष्टयरूपापेक्षाबुद्धेरभावेन तादृशप्रतीतेरसम्भवात् ।

यच्चैकस्मिन् द्वाविति प्रयोगस्य साधुत्वापत्तिरित्युक्तं तदपि न । यथा हि

---

[1] *द्वित्वादीनां यावध्दर्मिभावित्वं तत एवाभेदं चांगीकुर्वद्भिः तेषामपेक्षाबुद्धिजन्यत्वं नांगीकर्तव्यम् । नह्यपेक्षाबुद्धिजन्यस्य यावध्दर्मिभावित्वं सम्भवि ।*
[2] *प्रत्यक्षस्थल एवापेक्षाबुध्देरुपयोगो नानुमितौ न वा शाब्दसंख्याज्ञाने । अतोऽनुमितावा-पादितायामपेक्षाबुध्द्यभाव कथनं न युक्तम् । वाक्यं चेदमनन्वितम् ।*
[3] *एकत्वमात्रपर्यवसन्नतयेति पाठः स्याद्वा ?* [4] *अस्पष्टमिदम् ।*

संयोगस्य नैयायिकमते व्यासज्यवृत्तित्वेऽपि[1] एकस्मिन् संयुक्तशब्दः साधुस्तथा त्वन्मतेऽपि एकस्मिन् द्वाविति प्रयोगस्य साधुत्वापत्तेः । वस्तुतस्तु व्यधिकरणैकत्वद्वयमेव तत्प्रयोगसाधुत्वनिमित्तमिति तदभावान्न तस्य प्रयोगस्य साधुत्वापत्तिः ।

यच्च जीवानां ब्रह्मणश्च समगुणत्वापत्तिरित्युक्तं तन्न । स्वसमानाधिकरणान्योन्यसविशेषगुणनिरूपितापरिच्छिन्नानवधिकसंख्याकत्व-स्येश्वरगुणेष्वेव विद्यमानत्वात्[2] । लक्ष्म्यादिगुणेष्वपि तदभावात् । तस्यैवानन्तगुणशब्देन विहितत्वात् ।

यदपि चोक्तं प्रत्येकपर्याप्त्यङ्गीकारो व्यर्थ इति । तन्न । शरीरद्वित्वस्यानित्यत्वापत्त्या[3] ईश्वरस्यापितत्प्रयुक्तानित्यत्वापत्तौ तत्परिहारार्थत्वात् । ईश्वरस्य विकारित्वस्य सर्वप्रमाणबाधितस्यापत्त्या तत्परिहारार्थत्वाच्च । यच्च गुणविकारो न दोषमावहतीत्युक्तं तद् दूषणस्याप्ययोग्यम् । ' पराधीनविशेषाप्तिरनिवर्त्योऽन्यथाभवः । क्षीरादिवद् विकारः स्यान्नैव स स्याद् हरेः क्वचित् ' इत्यानुव्याख्याने विकारसामान्य-निषेधात् । सुधायामपि 'परिणामो द्विविधः । धर्मिविपरिणामो धर्मविपरिणामश्चेति । द्वयमपि प्रत्येकं द्विविधं निवर्त्यान्यथाभावोऽनिवर्त्यान्य-थाभावश्चेति । सर्वोऽपि पराधीनविशेषावाप्तिरूपः । स्वतन्त्रे हरौ तेषां मध्ये कोऽपि न सम्भवति ' इत्युक्तत्वाच्च ।

यच्चेश्वरे द्वित्वं[4] नित्यमेवेति नव्याख्यानां वचनं तत् सुधाऽनुव्याख्यानवाक्यरसानभिज्ञतां प्रकटयति । द्वित्वादिसंख्याव्यतिरिक्ता इति

---

[1] *नैयायिकमते संयोगस्य व्यासज्यवृत्तित्वमस्ति नवेति विचारणीयम् ।*
[2] *अस्पष्टमिदं समाधानम् ।* [3] *घटेश्वरद्वित्वस्यानित्यत्वेनेति पाठः स्यात् ।*
[4] *घटेश्वरद्वित्वमित्यर्थः ।*

शेषपूरणं विशिष्टस्यापि वाक्यस्य न त्वपरवाक्यस्यैव ।ज्ञापकाभावात् । इदं हि पद्यं सुधायामेकयैवावतारिकयाऽवतारितम् । तेनैकमेव वाक्यं विज्ञायते । नचैवं प्रतीकग्रहणानन्तरमेव शेषपूरणं कर्तव्यमित्युक्तमिति वाच्यम् । ' नित्या धर्मास्तदीयास्तु सर्वेस्मान्नैव भेदिनः' इति वाक्यं भगवद्धर्मा भगवतो न भिन्ना नित्यत्वादित्यनुमानेन भगवद्धर्माणां नित्यत्वं[1] साधयितुं प्राप्तम् । तत्र द्वित्वादिसंख्यायां व्यभिचारप्राप्तौ द्वित्वादिसंख्यायां नित्यत्वमेव नास्तीति न व्यभिचार इति प्रतिपादनाय सुधायां द्वित्वादिसंख्याव्यतिरिक्ता एव भगवद्धर्मा नित्या इत्यभिप्रायेण शेषपूरणं कृतम् [2] । एवं च यदि प्रथममेव शेषपूरणं कृतं तदा प्रतिपत्तुः किमर्थमिदं कृतमिति प्रतिपत्तिगौरवं स्यात् । हेत्वज्ञाने व्यभिचारस्यैव ज्ञातुमशक्यत्वात् । अत एव अस्मात् कारणादस्माद् भगवत इति हेतुपदव्याख्यानानन्तरमेव शेषपूरणं कृतम् । तस्माद् यथाश्रुतमेव सुधावाक्यं युक्तम् । वस्तुतस्तु परपक्ष एवास्य वाक्यस्य वैयर्थ्यम् । प्रयोजनानुपलम्भात् । नचोक्तानुमानस्य द्वित्वादिसंख्यायां व्यभिचारप्राप्तौ द्वित्वादिसंख्याव्यतिरिक्तत्वेन हेतुविशेषणार्थं शेषवाक्यं प्राप्तमिति वाच्यम् । पक्षविशेषणत्वेन प्र तीयमानस्य शेषस्य हेतुविशेषणत्वकल्पनस्याव्युत्पन्नप्रलापत्वात् [3] । अन्यथा अस्मात् कारणादिति हेतुपदव्याख्यानावसरे द्वित्वादिसंख्याव्यतिरिक्तत्वे सतीति शेषः कर्तव्यः स्यात् । भगवद्धर्मा भगवता न भिन्नाः द्वित्वादिसंख्याव्यतिरिक्तत्वे सति नित्यत्वादित्यनुमानेऽपि द्वित्वादिसंख्यायां बाधो दुर्वार एव । अतो द्वित्वादिसंख्याव्यतिरिक्ता इति पक्षेऽपि विशेषणं देयम् । ततश्च गौरवम् [4] । अपि च यदि द्वित्वादिसंख्या ईश्वरे नित्या स्यात् तर्हि साध्यस्याप्यवश्यकत्वाद् व्यभिचार एव न स्यात् । [5]न च तदपि प्रमाण

---

[1] अभेदमिति पाठः स्यात् । [2] क्लिष्टकल्पनेयम् । व्यभिचारे शङ्किते हेतुरेव नास्तीति न व्यभिचार इत्यनुक्त्वा शेषपूरणोक्तेरनुचितत्वात् ।
[3] तर्हि भवन्मतेऽपि पक्षविशेषणतया प्रतीयमानस्य शेषस्य हेतौ व्यभिचारपरिहारपरतया व्याख्यानं कथं संगच्छते ? [4]गौरवं कुतः ? अन्यथा बाधवारणायोगात् ।
[5]अस्य वाक्यस्यान्वयो न भाति ।

द्वित्वादिसंख्याव्यतिरिक्तविषयमिति वाच्यम् । प्रमाणाभावेनास्य वादस्य प्रज्ञावादत्वात् [1] । तस्माच्छेषपूरणं वाक्यं व्यर्थमेव स्यादिति यत्किञ्चिदेतत् [2] ।

यच्च सुधानुव्याख्यानविरोध इत्युक्तं सापि भ्रान्तिरस्मदाचार्यचरणारविन्दसेवाभिर्निवर्तनीया । अनुव्याख्यानसुधावाक्यार्थस्तु रहस्यत्वान्न लिख्यते ।

इत्थं गोपालकृष्णेन श्रीरामाचार्यसूनुना ।
द्वित्वचिन्तामणिश्चीर्णः पूर्णधीतोषकृद् भवेत् ।।

यो बुद्ध्या नयचन्द्रिकामपि सुधां सन्न्यायरत्नवली-
मेकीकृत्य विमथ्य पूर्णधिषणाचार्यानुकम्पानिधिः ।
सिद्धान्तं व्यतनोत् सतां प्रियतमं द्वित्वं विविक्तं स्थितं
स श्रीमान्नरसिंहदैशिकमणिर्दद्यात् सुविद्यां मम ।।

श्रीकृष्णार्पणमस्तु

श्रीरस्तु

---

[1] समुदायमृते इति प्रमाणबलात् भेदाभेदस्य, नित्यत्वस्य चांगीकारे काऽनुपपत्तिः? ।
[2] घटेश्वरद्वित्वविषये ग्रन्थकर्त्रा स्वाभिप्राय एव न स्पष्टं प्रकटीकृतः । व्यभिचारवारणावसरे नित्यत्वस्याभेदस्य च निराकरणात् तस्यानित्यत्वं भेदाभेदश्च सम्मत इति ज्ञायते ।व्यासज्यवृत्तित्वविरोधिनोऽन्ये ग्रन्थकर्तारो यावद्धर्मिभावित्वमत एवाभेदं चाङ्गीकुर्वन्तीति स्फुटस्तैर्विरोधः ।

द्वित्वमीमांसा

आर्याचार्यसम्प्रदायानुसारिगोपालकृष्णाचार्यकृता

अथ श्रीगोपालकृष्णाचार्य विरचिता

द्वित्वमीमांसा

श्रीवेदव्यासाय नमः। श्रीमदानन्दतीर्थभगवत्पादचार्यगुरुभ्यो नमः।

ॐ। द्वित्वं संयोगादिवत् प्रतिव्यक्ति समाप्तमिति श्रीमदाचार्यतात्पर्याभिज्ञशिखामणयः प्राहुराचार्याः। तत्र केचिदाधुनिकाः न्यायसुधाहृदयानभिज्ञाः निर्दोषेऽपि परमात्मनि दोषमारोपयन्त एवं वदन्ति।

द्वित्वस्य प्रतिव्यक्ति समाप्तत्वं न सम्भवति। तथा सत्येकस्मिन् दृष्टे एकत्वमिव द्वित्वमपि प्रत्यक्षं स्यात्। न च द्वित्वस्य प्रतियोगिनिरूप्यत्वात् तज्ज्ञानाभावादेकस्मिन् दृष्टेऽपि न द्वित्वप्रत्यक्षमिति वाच्यम्। यतो निरूपितप्रत्यक्षे धर्मिप्रत्यक्षमिव प्रतियोगिप्रत्यक्षं न हेतुः। प्रतियोगिनः पिशाचस्याप्रत्यक्षत्वेऽपि स्तम्भरूपधर्मिप्रत्यक्षमात्रेण स्तम्भः पिशाचो न भवतीति प्रत्यक्षदर्शनात्। किन्तु प्रतियोगिज्ञानमात्रमपेक्षितम्। तत् प्रकृतेऽपि सुलभमिति एकस्मिन् दृष्टेऽपि द्वित्वप्रत्यक्षापत्तिर्वज्रलेपायितैव॥ १॥

किञ्च द्वित्वद्वयस्य चतुष्ट्वव्याप्यत्वेन द्वित्वद्वयावच्छिन्नयोर्घटपटयोश्चतुष्ट्वावश्यंभावेन पदार्थद्वयदर्शने चतुष्ट्वप्रत्यक्षापत्तिः। एवमेव परार्धपर्यन्तसङ्ख्याप्रत्यक्षापत्तिरूह्या॥ २॥

अपि च द्वित्वपर्याप्त्यधिकरणवस्तुविषये द्वावित्यादिप्रयोगस्य साधुत्वेनैकस्मिन्नेव पदार्थे द्वावित्यादिप्रयोगस्य साधुत्वं स्यात्॥ ३॥

अपि च द्वित्वादेः प्रतिव्यक्तिसमाप्तत्वे एकत्वेन द्वित्वादेर्विरोधो न स्यात्। न चेष्टापत्तिरिति वाच्यम्। द्वा सुपर्णा द्वे ब्रह्मणीत्यादौ द्वित्वेन भेदसाधनानुपपत्तेः। ४।

अपि च द्वित्वस्य भेदाविनाभूतत्वादेकस्यैव भेदापत्तौ तदवयवानां च भेदापत्तौ वस्तुनो निस्स्वरूपत्वापत्तिः[1] ॥ ५ ॥

किञ्चास्मिन् पक्षे क्षणबहुत्वकल्पबहुत्वयोस्तारतम्यं न स्यात् एकस्मिन्नेकत्वस्येव द्वित्वादिसर्वसङ्ख्यायाः सत्वात् ॥ ६ ॥

अपि चास्मिन् पक्षे द्वित्वादेरपेक्षाबुद्धिजन्यत्वं सर्वतन्त्रसिद्धं न स्यात् एकव्यक्तिमात्रवृत्तित्वादेकत्ववत् ॥ ७ ॥

किञ्चैवं जीवगुणेऽल्पसङ्ख्यत्वमीश्वरगुणेऽनल्पसङ्ख्यत्वं च न स्यादिति जीवादनल्पगुणकेश्वरदुर्भिक्षापातः ॥ ८ ॥

अपिचैवं

"नरत्वादिकमप्येवं तत्तद्धर्मतयेयते ।
न सर्वधर्म एकोऽस्ति समुदायस्तु भिन्नगः ॥

न केनचिदभेदोऽस्य भेदाभेदोऽपि वा क्वचित् ।
समुदायमृते विष्णोः स्वगुणादीन् विनापि वा" ॥

इत्यनुव्याख्यानविरोधः ॥ ९ ॥

तथा "समुदायोऽनेकत्वसङ्ख्या । सा चापेक्षाबुद्धिजन्यत्वादयाव द्रव्यभाविनी भिन्नाभिन्नेति नाश्रययोरभेदापत्तिः" इत्या सुधावचनविरोधापत्तिश्च ॥ १० ॥

ननु तर्हि कथं जीवेश्वरद्वित्वव्यवस्था ? न तावज्जीवेश्वरद्वित्वं नित्यम् तथासति घटेश्वरद्वित्वस्यापि नित्यत्वापत्तौ घटाभावेऽपि घटाधिकरण

---

[1] *नेदमापादनं समीचीनम् । "न शून्यानां हि संयोगाद्भावो वस्तुन इष्यते इत्यनुव्याख्यानविरोधात् ।*

द्वित्वमस्तीति कल्पनाप्रसङ्गात् । किञ्च जीवेश्वरद्वित्वस्य नित्यत्वे यावद्द्रव्य-भावित्वेन जीवेश्वराभ्यामत्यन्ताभिन्नत्वापत्त्या यद् यदत्यन्ताभिन्नात्यन्ताभिन्नं तत् तदत्यन्ताभिन्नमिति व्याप्तिसत्वेन जीवेश्वरयोरत्यन्ताभिन्नत्वापाताच्च । नापि जीवेश्वरद्वित्वमनित्यम् । तथात्वे घटादेरिव जीवेश्वरयोरेव तदुपादानत्व-प्रसङ्गेन विकारित्वाद्यपारदोषप्राप्त्या ईश्वरदुर्भिक्षप्रसङ्गात् । तस्माद् द्वित्वं प्रातिस्विकमेवाङ्गीकार्यमिति चेत् ।

अत्रोच्यते । नित्यमेव जीवेश्वरद्वित्वम् । न तत्राद्यो दोषः । घटादेर्नाशेऽपि धर्मिसत्तानिरपेक्षविषयत्वादिधर्मवद् द्वित्वादीनामप्यवस्थानोपपत्तेः । तार्किकमते नित्याया अपि जातेरेकव्यक्तिनाशेऽपि व्यक्त्यन्तरेऽवस्थानवदेकस्य धर्मिणो घटादेर्नाशेऽपि ईश्वररूपधर्मिणि द्वित्वस्यावस्थानोपपत्तेश्च ।

द्वित्वादिसङ्ख्यायां[1] नित्यत्वे मानं तु -

"नित्या धर्मस्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः"

इत्यनुव्याख्यानम् । तथा "नित्या इति" इति प्रतीकग्रहणानन्तरम् "तुशब्दोऽवधारणे। नित्या इत्यनेन सम्बध्यते। अस्मात् कारणाद् अस्माद् भगवतः। द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेषः" इति तद्व्याख्यानरूपसुधावचनमपि प्रमाणम् ।

यद्यपि सुधायां नित्या धर्मा इत्यत्र द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेष इति वचनेन द्वित्वादिसङ्ख्याया नित्यत्वं नास्तीति प्रतीतेस्तद्वाक्यं द्वित्वादिसङ्ख्याया नित्यत्वे प्रमाणीकर्तुं न शक्यते । तथापि नित्या इत्यनुव्याख्याने वाक्यद्वयमस्ति । तदीया भगवति विद्यमानाः सर्वेऽपि धर्मा नित्या एवेत्येकं वाक्यम् । अस्मान्नित्यत्वात् कारणात् अस्माद् भगवतः सकाशाद्

---

[1] *ईश्वरगतद्वित्वादिसंख्याया इत्यर्थः ।*

भेदिनो नैवेत्यपरं वाक्यमिति। तत्र द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेषपूरणं द्वितीयवाक्य एव । अस्मात् कारणादस्माद् भगवत इति द्वितीयवाक्यस्थितपदव्याख्यानान्तरं द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेष इति शेषकरणात्। तथाचायमभिसन्धिः सुधाकृतः- भगवदीयाः सर्वेऽपि धर्मा नित्या एव। न तत्र विभागोऽस्ति कश्चिन्नित्यः कोऽप्यनित्य इति। नित्यत्वाच्च ते धर्मा भगवतोऽत्यन्ताभिन्नाः । नचैवं द्वित्वादिसंख्यायामत्यन्ताभिन्नत्वरूप-साध्याभावाद् बाध इति वाच्यम्। द्वित्वादिव्यतिरिक्तधर्माणामेवास्मिन्ननुमाने पक्षत्वात् । न च तर्हि द्वित्वादिसङ्ख्यायामेव नित्यत्वहेतोर्व्यभिचारः । द्वित्वादिसङ्ख्याव्यतिरिक्तत्वे सति नित्यत्वस्यैव हेतुत्वेन व्यभिचारानवकाशात् इत्यनुव्याख्यानाभिप्राय इति। यदि द्वित्वादिसङ्ख्याया अनित्यत्वमत्राभिप्रेतं स्यात् तदा नित्या इति प्रतीकग्रहणानन्तरमेव द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेष इति कर्तव्यं प्रसज्येतेति। एतेन "खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत्" इत्युत्सर्ग एव न नियम इति सूचितमित्येके।

अन्ये तु अनित्यैवास्तु द्वित्वादिसङ्ख्या। न चैवं भगवतो विकारादिदोष-प्रसङ्गः। द्रौपदीवसनेन्द्रचापादिवदनुपादानसृष्ट्युपपत्तेः । सोपादानत्वेऽपि भगवदन्यस्यैव कस्यचिदुपादानत्वोपपत्तेश्चेति वदन्ति।

अपरे तु भगवत एवोपादानत्वमस्तु। न तावता कश्चन दोषोऽस्ति। द्रव्यो-पादानत्वस्य दोषत्वेऽपि गुणोपादानत्वस्यादोषत्वात्। अत एव ज्ञानानन्दाद्या-त्मकस्यापि सञ्जीवस्य नीचोच्चतात्मना परिणामोऽङ्गीक्रियते। वस्तुतस्तु उपादेया धर्मा द्विविधाः। केचित् स्वोत्पत्त्यर्थमुपादानावयवशैथिल्यमपेक्षन्ते। यथा पार्थिववस्तुनि रूपादयः। तेषां पाकजत्वेन पाकेनावयव-शैथिल्यावश्यंभावात्। केचित्तु तदनपेक्षाः। यथा संयोगविभागादयः। न हि घटादेः कालाकाशादिना संयोगे भवितव्ये उपादाने अवयवशौथिल्यं किञ्चिदस्ति। एवं च द्वित्वादि-सङ्ख्यायाः सोपादानत्वेऽपि उपादानस्यैकप्रकारेणावस्थानसंभवान्न विकारादि

[1] भित्तिप्रभृतिष्वपि-कपाठः

दोषप्रसङ्गः। विकारो हि न स्वतो दोषः। किन्त्ववयवशैथिल्यादिदोषान्तर-कारणत्वेन। न च द्वित्वोपादानत्वाय भगवतः कश्चिदवयवशैथिल्यादिरस्ति। तस्माद् द्वित्वस्यानित्यत्वेऽपि न कश्चिद् दोष इति वदन्ति। तस्मात् कथं द्वित्वं प्रातिस्विकमित्युच्यत इति॥

अत्राहुरार्याचार्यसम्प्रदायाभिज्ञाः ॥

द्वित्वं प्रत्येकपरिसमाप्तमेव किन्त्वेकमेव द्वित्वमुभयत्र व्यासज्यवृत्ति। घटपटयोरेकस्य द्वित्वस्य सत्वे मध्यवृत्तिघटेनापि द्वित्वस्य प्रत्यासत्तिप्रसङ्गेन [1]तत्प्रभृतिष्वपि द्वित्वस्यावस्थानप्रसङ्गात्। प्रत्यासत्तिर्नास्तीति चेन्न। समवायो नास्ति संयोगो वा आधाराधेयभावो वा। नाद्यः। अनङ्गीकारात्। न द्वितीयः। द्रव्ययोरेव संयोग इति नियमाभावादिति टीकानुसारेण संयोगोपपत्तेः। न तृतीयः। आधाराधेयभावस्य न्यायप्राप्तत्वात्॥

अपि च द्वित्वस्य व्यासज्यवृत्तित्वे कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा। अयमर्थः । द्वित्वमेकैकस्मिन् पदार्थे सामस्त्येन वर्तते चेदेकत्रैव कृत्स्नप्रसक्तेरन्यत्रावस्थानाभावप्रसङ्गः । अथांशभेदेन वर्तते चेत् तर्हि द्रव्यातिरिक्तं सर्वं निरवयवमिति साम्प्रदायिकशब्दविरोध इति।

किञ्चापेक्षाबुद्धिव्यङ्ग्यं द्वित्वमिति पक्षे किं घटादौ जायमान एव परिमाणादिकमिव द्वित्वमपि जायते किं वा धर्म्यन्तरे जाते सत्येव ? नाद्यः। यावद्द्रव्यभावित्वेनात्यन्ताभिन्नस्य द्वित्वस्य धर्म्यन्तरेणात्यन्ताभिन्नत्वे धर्मिणो-रत्यन्ताभेदस्य असतोऽपि धर्म्यन्तरस्य सत्वस्य चापातात्। न द्वितीयः। धर्म्यन्तरे यावद्द्रव्यभाविनस्तस्य तदभिन्नत्वापातेन द्वित्वेन सह धर्मिणोरभेदात् भेदाभेद [2]इति" स्वसिद्धान्तविलोपप्रसङ्गात्[3] ।

[1] भित्तिप्रभृतिष्वपि-कपाठः
[2] द्वित्वेन सह धर्मिणोरभेदात् भेद इति -क
[3] नेदमापादनं स्पष्टम्।

अथ द्वित्वस्यापेक्षाबुद्धिजन्यत्वमङ्गीक्रियत इति चेन्न । तर्हि बहूनां पुरुषाणामेकस्मिन् काल एव द्वौ घटाविति बोधे जाते तत्तदपेक्षाबुद्धिभेदेनानेक-द्वित्वकल्पनाप्रसङ्गात् । त्वदुक्तन्यायेनैकस्यैव द्वित्वद्वयाधिकरणत्वे चत्वार इति बुध्यापत्तेश्च । न च द्वित्वद्वयपर्याप्त्यधिकरणत्वं चत्वार इति प्रतीतिधर्मि-तावच्छेदकमिति वाच्यम् । तर्हि द्वयोर्द्वित्वद्वयपर्यप्त्यधिकरणत्वेन चत्वार इति बुद्धेरपरिहार्यत्वात्[1] । एवं त्रित्वचतुष्टादिबहुत्वेन नव षोडशेत्यादि प्रतीत्यापत्तिरप्यूह्या ।

किञ्चास्मिन् पक्षे स्वकीयपरकीयापेक्षाबुद्धिजातेषु स्वापेक्षाबुद्धिजातमेव द्वित्वं तत्पुरुषप्रत्यक्षमिति, अयमेकोऽयमेक इत्यपेक्षाबुध्यनन्तरं मनसोऽन्यत्र व्यासङ्गे सति जातमपि द्वित्वं नानुभूयते न स्मर्यते चेत्यज्ञायमानमपि द्वित्वं किञ्चिदस्तीति च कल्प्यमिति बहुकल्पनाप्रसङ्गः ।

अपिच द्वित्वं सर्वमप्याश्रयेण भिन्नाभिन्नं वा किञ्चिदेव वा ? नाद्यः । ईश्वरीयापेक्षाबुद्धिजन्यस्य द्वित्वस्य यावद्द्रव्यभावित्वेनात्यन्ताभिन्नस्य भिन्नाभिन्नत्वायोगात् । "यावद्वस्तु न भेदवत्" इति शास्त्रमौत्सर्गिकमिति भवदीयां दुराशामपनेष्यामः । ईश्वरीयापेक्षाबुद्धेर्द्वित्वोत्पादकत्वं नास्तीति च कल्पनमतिसाहसम् ।

किञ्च सर्वस्यापि द्वित्वस्याश्रयेण भिन्नाभिन्नत्वे भगवद्गुणरूपादि-द्वित्वानामप्याश्रयेण भिन्नाभिन्नत्वमपेक्षाबुद्धिजन्यत्वं च स्यात् । तथाचेश्वरस्य सदा बहुगुणत्वं न स्यात् । नच परमेश्वरगुणादिषु तदीयापेक्षाबुद्धिप्रयुक्तं द्वित्वादिकं सदा वर्तत इतीश्वरस्य सदा बहुगुणत्वादिकं सम्भवतीति वाच्यम् । अपेक्षाबुद्धिप्रयुक्तमित्यस्य न तावदपेक्षाबुद्धिजन्यमित्यर्थः । अपेक्षाबुद्धेर्गुणानां च सदातनत्वेन द्वित्वादेरप्यनादित्वावश्यम्भावेन तज्जन्यत्वानुपपत्तेः ।

---

[1] *चैत्रमैत्रयोर्युगपद् घटपटाविति ज्ञाने घटपटयोर्द्वित्वद्वयपर्याप्त्यधिकरणत्वात् चत्वार इति प्रतीतिः स्यादित्यर्थः ।*

नाप्यपेक्षाबुद्धिव्यङ्ग्यमित्यर्थः[1] । कस्यचिदपेक्षाबुद्धिव्यङ्ग्यत्वं कस्यचिदपेक्षा बुद्धिजन्यत्वमिति कल्पनाप्रसङ्गात् । सर्वत्राप्यपेक्षाबुद्धिव्यङ्ग्यत्वोप-पत्तेर्द्वैविध्यकल्पनाऽयोगाच्च । न द्वितीयः । समुदायस्तु भिन्नगः, न केनचिदभेदोऽस्येत्यादिप्रमाणविरोधापत्तेः ।

किञ्च द्वित्वस्यापेक्षाबुद्धिजन्यत्वे इदानीं घटपटयोर्द्वित्वमस्तीति शाब्दज्ञान-मप्रमाणं स्यात् । अपेक्षाबुद्धेस्तदानीमनुत्पत्तेः । नचेश्वरीयापेक्षाबुद्धिजन्य-द्वित्वमादाय तज्ज्ञानस्य प्रामाण्यं सम्भवतीति वाच्यम् । घटपटयोर्द्वित्वमस्ति तत् तव प्रत्यक्षं भवतीत्यादिशाब्दज्ञानस्याप्रामाण्यप्रसङ्गे तात्पर्यात् ।

अपि चापेक्षाबुद्धिजन्यं द्वित्वमपेक्षाबुद्धिनाशे तथैवावतिष्ठते नश्यति वा । नाद्यः । अपसिद्धान्तात् । न द्वितीयः । निमित्तकारणनाशेन कार्यनाशे घटादेरपि दण्डादिनाशेन नाशप्रसङ्गात् । न च सिद्धान्ते तार्किकाभिमतासमवायि-कारणानङ्गीकारेण तन्तुसंयोगादेरपि निमित्तकारणतया तन्नाशे सति पटनाश-दर्शनात् कथं निमित्तकारणनाशेन कार्यनाशाभाव इति वाच्यम्[2] । विवक्षित-तन्तुसंयोगस्यैव पटात्मकत्वेन तन्तुसंयोगनाशात् पटनाशइति द्वयाभावेन व्यभिचारात्[3] ।

अपि चानेकत्वावगाहिबुद्धेः सर्वत्र साम्येन द्वित्वत्रित्वादीनां वैलक्षण्यं न स्यात्[4] । नचैकत्वद्वयविशिष्टवस्त्ववगाहिनीबुद्धिर्द्वित्वनिमित्तमेकत्वत्रयविशिष्ट-वस्त्ववगाहिनी बुद्धिस्त्रित्वे निमित्तम्, एवं निमित्तवैलक्षण्यादेव द्वित्वादि-वैलक्षण्यं सम्भवतीति वाच्यम् । तर्हि एकत्वाधिकरणकद्वित्वादिकं नापेक्षबुद्धि-

---

[1] *एवं विकल्प्य दोषाभिधाने द्रव्यत्वगुणाश्रयत्वयोरपि प्रयोज्यप्रयोजकभावो दुर्घटः स्यात्*
[2] *तद्दृष्टान्तेनात्राप्यपेक्षाबुद्धिनाशाद् द्वित्वनाशः संभवतीति शङ्कितुरभिप्रायः ।*
[3] *अव्यभिचारादिति स्यात् । निमित्तकारणनाशेन कार्यनाशो न भवतीति नियमस्य व्यभिचाराभावादित्यर्थे । अत एवेदमापादनं संभवतीति भावः । अत्रेश्वरेच्छारूप-निमित्तकारणनाशात् स्वाप्नपदार्थनाशः, तथा बिंबस्योपाधेस्तयोः सान्निध्यस्य वा नाशात् प्रतिबिंबनाशः कुतो न विचारित इति न ज्ञायते ।*
[4] *द्वित्वादीनां यावद्द्रव्यभावित्वस्याभेदस्य चाङ्गीकारेऽपि अपेक्षाबुद्धिव्यङ्ग्यत्वस्वीकारात् कथमयं दोषः परिह्रियते ?*

जन्यमिति स्यात् । नच तत्राप्यपेक्षाबुद्धिविशेषाद् द्वित्वादिकमुत्पद्यत इति वाच्यम् । इदमेकमेकत्वमिदं चैकमेकत्वमिति खल्वपेक्षाबुद्ध्या द्वित्वादिकमुत्पद्यत इति वक्तव्यम् । सा चैकत्वाधिकरणकैकत्वद्वयबुद्धिरूपेति द्वित्वबुद्धिप्रवाहाविच्छेदेनानवस्था स्यात्।

अथैकत्वाधिकरणकद्वित्वज्ञानं विनापि वस्तुत एकत्वद्वयज्ञानमेव प्रथमापेक्षाबुद्धिरिति नानवस्थेति चेन्न । प्रमेयमित्यादिज्ञानस्याप्यपेक्षाबुद्धित्वापातात् । नचैकत्वप्रकारकज्ञानमपेक्षाबुद्धिः । एकोऽत्र घटोऽस्तीति ज्ञानस्याप्यपेक्षाबुद्धित्वापातात् । न च वस्तुतोऽनेकपदार्थविशेष्यकैकत्वप्रकारकज्ञानमपेक्षाबुद्धिः । सर्वं प्रमेयवदिति ज्ञानस्याप्यपेक्षाबुद्धित्वापातात्। नचैकत्वमात्रप्रकारकत्वं विवक्षितम्। अयमेकइत्यपेक्षाबुद्धेरिदंत्वप्रकारकत्वेन एकत्वमात्रप्रकारकत्वाभावेनापेक्षाबुद्धित्वाभावप्रसङ्गात् । न चानेकविशेष्यकत्वे सति इदंत्वैकत्वमात्रप्रकारकत्वमपेक्षाबुद्धिलक्षणम् । अयमेको घट इत्याद्याकारकापेक्षाबुद्धेर्घटत्वादिप्रकारकत्वेनासम्भवप्रसङ्गात् । अथ पदार्थतावच्छेदकेदंत्वप्रकारकत्वे सति अनेकविशेष्यकत्वं तल्लक्षणम् । वस्तुतो द्वयोर्घटयोर्यत्रैकत्वभ्रमः, तस्यापि ज्ञानस्योक्तरूपत्वेनातिव्याप्तेः । न चैकत्वविरुद्धधर्माप्रकारकत्वमपि विवक्षितम् । तद्विरुद्धत्वं नाम तदनधिकरणाधिकरणत्वं वा तदनधिकरणमात्राधिकरणत्वं वा ? नाद्यः । एकत्वसङ्ख्यायास्तन्मात्रवृत्तित्वेन घटत्वादेः तदनधिकरणघट[illegible] त्वेनायमेको घट इत्याद्यपेक्षाबुद्धावव्याप्तेः । न च तदधिकरणानधिकरणत्वं[1] तद्विरुद्धत्वम् ! घटत्वादिकं तु तदधिकरणतदनधिकरणवृत्तीति न दोष इति वाच्यम्[2] । अयमेको नायमेक इति प्रतीतिविषयानेकत्वस्यापि एकत्वानधिकरणमात्राधिकरणकत्वाभावेन[3] तद्विरुद्धत्वाभावेनोक्तातिव्याप्तेः तादवस्थ्यात्।

[1]तदधिकरणावृत्तित्वं-क [2]तथा च एकत्वाधिकरणानधिकरणत्वरूपं (तदधकरणावृत्तित्वरूपं वा)विरुद्धत्वं नास्तीति अयमेको घट इत्यत्र नाव्याप्तिरिति भावः । [3]एकत्वानधिकरणमात्रानधिकरणकत्वाभावेन -क। अस्पष्टमिदम्।

न द्वितीयः । अनेकत्वस्यैकत्वाधिकरणाधिकरणत्वेन तदधिकरणा--[1]--धिकरण--[2]---तद्विरुद्धत्वाभावेनोक्तातिव्याप्तेस्तादवस्थ्यात् । अथ----[3]---यावत्स्वविशेष्यकाश्रयवत्वविषयकत्वे सति अनेकविशेष्यकत्वमपेक्षाबुद्धेर्लक्षणम् । सर्वं प्रमेयवदिति ज्ञानेऽतिव्याप्तेरपरिहारात् । नचैकत्वानेकत्वकोटिकसंशयविरोधित्वे सतीति विशेषणान्नोक्तदोष इति वाच्यम् । द्वित्वादिजनकापेक्षाबुद्धेरयमेक इमौ द्वावित्यादिरूपाया उक्तरूपत्वाभावेनाव्याप्तेः।

अस्तु वा यत् किञ्चिदपेक्षाबुद्धिलक्षणनिर्वचनम् । तथापि प्रमातृनिष्ठया अपेक्षाबुध्या प्रमेये कथं द्वित्वमुत्पद्यते? न हि कोऽपि धर्मः प्रमातुर्ज्ञानमात्रेण जायमानो दृष्टः । तथात्वे च शुक्तिरजतादेर्वैज्ञानिकत्वं वदद्भिर्विज्ञानवादिभिः तात्कालिकत्वं वदद्भिर्भास्करादिभिः प्रातिभासिकत्वं वदद्भिर्मायावादिभिश्च ज्ञाततया ज्ञानजन्यत्वं वदद्भिर्भाट्टैश्च किमपराद्धम् ? अन्यथा रसादिकमपि ज्ञानेनेन्द्रियसन्निकर्षेण वा जायत इत्युक्तौ किमुत्तरं स्यात् ? अङ्गुल्यवष्टभ्भेन द्वितीयचन्द्रादिकमपि जायत इत्युक्तौ किमुत्तरं स्यात् ? ज्ञानजन्यत्वे च द्वित्वादेः प्रतिपुरुषमनेकद्वित्वादिकल्पनाप्रसङ्ग इत्यादिप्रसङ्गाश्च प्रागुपन्यस्ताः।

तथा च प्रयोगः। द्वित्वादिकं स्वानधिकरणज्ञात्रधिकरणकज्ञानजन्यं न भवति ज्ञातृभिन्नज्ञेयवृत्तिधर्मत्वाद् घटत्वादिवत् । नच ज्ञानविषयत्वादिरूपे धर्मे व्यभिचारः । ज्ञानातिरिक्तज्ञानविषयत्वानङ्गीकारात् । अन्यथा ज्ञातता-निराकरणानुपपत्तेः।

तस्मादपेक्षाबुध्या द्वित्वं व्यज्यत इत्येव वाच्यम् । नचैवं सति "साचापेक्षाबुद्धिजन्यत्वादयावद्द्रव्यभाविनी" इति सुधाविरोध इति वाच्यम् ।

[1,2]अत्रैककोशे चतुरक्षरपातो निर्दिष्टः। कोशान्तरेऽनुस्यूततया लिखितम्।
[3]"अथ यावत्स्वविशेष्याश्रयप्रकारकत्वे सति अनेकविशेष्यकत्वमपेक्षाबुद्धेर्लक्षणम् । अत्रैकत्वमत्रैकत्वमित्यादेरेकत्वविशेष्यकप्रतीतेरपेक्षाबुद्धित्वाभावप्रसङ्गात् । अथ यावत्स्वविशेष्यकाश्रयवत्वविषयकत्वे सति इति"पातस्थलीयः पाठः कोशान्तरे।

तस्यास्तार्किकमताभ्युपगमवादरुपत्वात् । दृश्यते हि टीकाकारीयवचनेषु तत्रतत्राभ्युपगमवादः । तथाहि ॥ ज्ञानं प्रति विषयस्य कारणत्वमस्तीति प्रमाणपद्धतावुक्तम् [1] । सन्निकर्षेणान्यथासिद्धत्वान्न साक्षात्कारे विषयो हेतुरिति सुधायामन्यथाख्यातिवादप्रसङ्गे निरूपितम् । अत एवोक्तं प्रमाणपद्धतिटिप्पण-कारैर्वेदेशतीर्थप्रभृतिभिः:- विषयस्य प्रत्यक्षकारणत्ववचनं सुधाविरोधादभ्युप-गमवादरूपमिति । विष्णुतत्वनिर्णयटीकायामप्रामाण्यं विसंवादलिङ्गानुमेय-मित्युक्त्वा विसंवादसहकृतसाक्षिवेद्यमित्यप्युक्तम् । तत्रान्यतरस्याभ्युपगम-वादरूपत्वं वक्तव्यम् । तथा सुधायामेव महत्वसमानाधिकरणोद्भूतरूपवत्वं वा प्रत्यक्षत्वप्रयोजकमित्युक्तम् । तच्च महान्ति रूपवन्ति द्रव्याणि चक्षुस्त्वचो विषय इति पद्धतिविरुद्धम् ।

ये च द्वित्वस्य प्रतिव्यक्तिसमाप्तत्वे एकस्मिन् दृष्टे द्वित्वप्रत्यक्षापत्तिरित्यादयो दोषा निरूपितास्ते सर्वेप्यज्ञानविजृम्भिता एव । तथाहि । एकस्मिन् दृष्टे द्वाविति प्रत्यक्षापत्तिर्द्वित्वमात्रप्रत्यक्षापत्तिर्वा ? नाद्यः । धर्म्यन्तरे इन्द्रियसन्निकर्षाभा-वेनोभयधर्मिकद्वित्वप्रत्यक्षानुपपत्तेः । न द्वितीयः । अयमस्य द्वितीय इति प्रत्यक्षस्यैकमात्रधर्मिप्रत्यक्षेऽपि दर्शनेनेष्टापादनत्वाच्च । **द्वितीयत्वातिरिक्त द्वित्वानङ्गीकारात् । किन्तु द्वितीयत्वमेव द्वित्वमिति**[1] । तच्च द्वित्वं प्रत्येकं परिसमाप्तमेवेति कुतो द्वित्वस्य व्यासज्यवृत्तित्वप्रत्याशा ? । वस्तुतस्तु सिद्धान्ते संयोगस्य प्रत्येकपरिसमाप्तत्वेऽपि नैकधर्मिप्रत्यक्षमात्रेण संयोगप्रत्यक्षं कि– धर्म्यन्तरप्रत्यक्षमपि तत्र कारणम् । तथा द्वित्वस्य प्रतिव्यक्तिसमाप्तत्वेऽपि नैकधर्मिप्रत्यक्षमात्रेण द्वित्वप्रत्यक्षं भवति किन्तु धर्म्यन्तरप्रत्यक्षमपि तत्र कारणमिति काऽनुपपत्तिः? नहि घटमात्रे दृष्टे घटः पटेन संयुक्तः, घटपटौ संयुक्ताविति वा प्रत्यक्षमुत्पद्यते । यदि च निरूपितप्रत्यक्षे निरूपकज्ञानमात्रस्य हेतुत्वेऽपि संयोगप्रत्यक्षमात्रे प्रतियोगिप्रत्यक्षमपि कारणं कल्प्यते तर्हि

[1]*अयं विषयः प्रमाणपद्धतौ कुत्रोक्तः इति मृग्यः ।*
[2]*द्वितीयत्वं न द्वित्वं किन्तु द्वित्वसङ्ख्यापूरकत्वं अन्यथा तीयप्रत्ययवैयर्थ्यमिति प्रत्यवस्थाने वस्तुतस्तुपक्ष एव समाश्रयणीयः।*

द्वित्वप्रत्यक्षेऽपि तथास्तु ।

यच्चोक्तं द्वित्वद्वयस्य चतुष्ट्वव्याप्यत्वेन पदार्थद्वयदर्शने चतुष्ट्वप्रत्यक्षापत्तिरिति । तदेतेनैव परास्तम् । चतुर्थत्वातिरिक्तचतुष्ट्वाभावस्योक्तत्वात् । संयोगदिवत् प्रतिव्यक्तिसमाप्तत्वेऽपि प्रतियोगिप्रत्यक्षाभावेन प्रत्यक्षाभावोपपत्तेश्च[1] । त्वत्पक्षेऽपि द्वित्वचतुष्ट्वादेः सर्वत्र सत्वेन एकधर्मिप्रत्यक्षे सति प्रत्यक्षापाताच्च[2] । तन्त्वादिषु व्यासज्यवृत्तिपटादेर्यावद्धर्मिप्रत्यक्षाभावेऽपि प्रत्यक्षत्वस्य तावकैरङ्गीकृतत्वाच्च [3] ।

यच्च द्वित्वपर्याप्त्यधिकरणविषये द्वावित्यादिप्रयोगस्य साधुत्वेन एकस्मिन् पदार्थे द्वावित्यादिप्रयोगस्य साधुत्वापत्तिरित्युक्तम् । तत्र द्वित्वाधिकरणेत्येव किं नोक्तम्? यद्येकस्मिन्नपि द्वित्वस्य विद्यमानतया द्वावित्यादिप्रयोगापत्तिभयेन द्वित्वपर्याप्त्यधिकरणेत्युक्तम् । तर्हि तद्भयेनैव मयापि परस्परभिन्नाधि-करणकद्वित्वाधिकरणविषय एव द्वाविति प्रयोगस्य साधुत्वमुच्यते । परस्परभिन्न द्वित्वद्वयाधिकरणविषये वा द्वावितिप्रयोगस्य साधुतेति (वा) ।

यदपि एकत्वद्वित्वयोर्विरोधो न स्यादिति तत् त्वत्पक्षेऽपि समानम्[4] । एकत्वद्वित्वयोः परस्परविरहसमानाधिकरणात्वस्य त्वयापि कथमपि वक्तुमशक्यत्वात् । किन्तु एकत्वद्वित्वयोर्व्याप्यव्यापकभाव एवास्ति । न च तावता विरोधः । पृथिवीत्वद्रव्यत्वयोरपि विरोधापातात् । कथं तर्हि द्वित्वेन भेदसाधनमिति चेत् । इत्थम् । संयोगस्य प्रतिव्यक्तिसमाप्तत्वेऽपि उभयाधिकरणावच्छेदेनैव प्रत्यक्षत्वं तथाविधेन संयोगेन भेदसाधनं च यथा

[1]*घटपटोभयप्रत्यक्षस्थले तयोः प्रत्येकं द्वित्वद्वयस्य वृत्तितया चतुष्ट्वप्रत्यक्षापादने नेदं समाधानं संभवति ।*
[2]*द्वित्वादेः व्यासज्यवृत्तित्वपक्षे व्यासज्यवृत्तिधर्मप्रत्यक्षं प्रति यावद्धर्मिप्रत्यक्षस्य कारणत्वमुक्त्वा सुपरिहरमिदमापादनम्।*
[3]*इदमसमीचीनमिति भाति । सिद्धान्ते पटे तन्तुवृत्तित्वस्य क्वाप्यश्रवणात् ।*
[4]*न समानम् । एकत्वाधिकरणे द्वित्वपर्याप्त्यभावस्य द्वित्वपर्याप्त्यधिकरणे एकत्वाभावस्य च वक्तुं शक्यत्वात् ।व्यासज्यवृत्तित्वपक्षे एकत्वद्वित्वपर्याप्त्योर्विरोधो न स्यादित्येवापादनपर्यवसानात् ।*

क्रियते, यथा च सादृश्यस्य प्रतिव्यक्तिसमाप्तत्वेऽपि तेन भेदः साध्यते, तथा द्वित्वस्यापि भिन्नाधिकरणावच्छेदेनैव प्रत्यक्षतया यादृशं प्रत्यक्षं तादृशेन प्रतियोगिना तेन भेदसाधनं सङ्गच्छते [1]।

यच्च द्वित्वस्य भेदाविनाभूतत्वादेकस्यैव भेदापत्तौ तदवयवानामपीत्यादिना वस्तुनः निःस्वरूपत्वापादनं तदज्ञानविजृंभितम् । एकत्वस्यापि भेदाविनाभूतत्वादेकस्मिन्नपि भेदापत्तौ इत्यादिना त्वन्मतेऽपि वस्तुनो निस्स्वरूपत्वापातात् । अथ भेदो नामान्योन्याभावः तदङ्गीकारेऽपि न वस्तुनो निस्स्वरूपत्वापत्तिरिति मन्यसे तर्हि ममापि तुल्यम्[2] । वस्तुतस्तु यत्प्रतियोगिकं द्वित्वं तत्प्रतियोगिकं भेदं साधयति। एकस्मिन्नङ्गीक्रियमाणद्वित्वं त्वन्यप्रतियोगिकमेव न स्वप्रतियोगिकम्। अन्यप्रतियोगिकस्तु भेदः सम्मत एव सर्वेषामिति न किञ्चिद् बाध[illegible]।

यदपि चोक्तमस्मिन् पक्षे कल्पबहुत्वक्षणबहुत्वयोस्तारतम्यं न स्यादिति। तत्र त्वत्पक्षेऽपि एकस्मिन्नेव द्वित्वस्येव सर्वसङ्ख्याया अपि जननात् कथं न स्यात् तारतम्याभावः? अथैकस्मिन्नेव त्वन्मते[3] सर्वापि सङ्ख्याऽपर्याप्त्या किन्तु व्यासज्यवृत्तिरिति वैषम्यमिति चेन्न। सर्वेषु कल्पेषु सर्वेषु क्षणेष्वपि बहुत्वस्य प्रत्येकपरिसमाप्ततया[4] तारतम्यानुपपत्तेरपरिहारात्।

अथ कल्पेषु क्षणनिरूपितबहुत्वं नास्ति क्षणेषु तु कल्पनिरूपितबहुत्वमस्तीति तयोस्तारतम्यमिति चेत् । तुल्यमिदं ममापि । एतेन जीवगुणेषु अल्पसंख्यत्वमित्यादिनोक्तं दूषणमज्ञानविजृम्भितमेव जातम् । जीवगुणेषु यत्किञ्चिन्निरूपितसकलसङ्ख्यायाः सत्वेऽपि ईश्वरगुणनिरूपितबहुत्वसंख्याया

[1] *द्वासुपर्णेति श्रुत्या जीवेश्वरभेदसिद्धिरुच्यते । यद्येकस्मिन्नपिद्वित्वपरिसमाप्तिः तर्हि कथमनया श्रुत्या [illegible]सिद्धिरिति न ज्ञायते। नहीदं प्रत्यक्षस्थलम्।*

[2] *अस्पष्टमिदं समाधा[illegible] अनुव्याख्यानसुधाविरोध एव वक्तव्यः।*

[3] *मन्मते इति स्यात्।*

[4] *इदमस्पष्टम्। व्यासज्यवृत्तित्ववादिभिः प्रत्येकपरिसमाप्तिः नैवाङ्गीक्रियते।*

अभावेन प्रत्युत तन्निरूपिताल्पत्वस्यैव विद्यमानत्वेन जीवगुणानामीश्वरगुणापेक्षयाऽल्पत्वसंभवात् । तथेश्वरगुणेषु जीवगुणनिरूपितबहुत्वस्यैव विद्यमानत्वेन जीवगुणापेक्षया बहुत्वस्य च सम्भवात् [1]।

यच्च सर्वतन्त्रसिद्धं द्वित्वादेरपेक्षाबुद्धिजन्यत्वं न स्यादिति दूषणं तदिष्टापादनरूपत्वादपास्तम्। नरत्वादिकमप्येवमित्याद्यनुव्याख्यानं तु पश्चाद् व्याख्यास्यते।

किञ्चैवं सति जीवेश्वरद्वित्वे ईश्वरघटद्वित्वे वा का व्यवस्था ? न तावन्नित्यं तत्। घटनाशे सति व्यासज्यवृत्तिद्वित्वं घटं विहायेश्वर एव पर्याप्तं सद् वर्तते वा धर्मिसत्तानिरपेक्षमेव प्रतियोगित्वादिवदनाश्रयमनुवर्तते वा ? आद्येपीश्वरेणाभेदमाप्नोति वा भेदमेव वा ? नाद्यः । जडधर्मेणेश्वरस्याभेदापत्तेः । न द्वितीयः। प्रमाणाभावेनादृष्टकल्पनाऽयोगात्। न द्वितीयः। संख्यायाः धर्मिसत्तासापेक्षत्वस्यैव सर्वैरङ्गीकारात् । किञ्च द्वित्वस्य नित्यत्वेन यावद्द्रव्यभाविनो जीवेश्वराभ्यामत्यन्ताभिन्नत्वापत्त्या यद् यदत्यन्ताभिन्नात्यन्ताभिन्नं तत् तदत्यन्ताभिन्नमिति व्याप्त्या जीवेश्वरयोरत्यन्ताभिन्नत्वापातः[2]।

नाप्यनित्यम्। जीवेश्वरयोरेव तदुपादानत्वप्रसङ्गेनेश्वरस्य विकारित्वापत्त्या तत्प्रयुक्तजनिमृत्यादिदोषप्रसङ्गेनेश्वर दुर्भिक्षापातात्।

अत्र केचिद् वदन्ति ॥ नित्यमेव जीवेश्वरद्वित्वम् । न च तत्प्रमाणाभावः । "नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः इत्यनुव्याख्यानव्याख्यानावसरे "द्वित्वादिसंख्याव्यतिरिक्ता इति शेषः"इति सुधावाक्यस्य तत्र प्रमाणत्वात् । तथाहि । नित्या धर्मस्तदीयास्तु सर्वे, सर्वेऽस्मान्नैव भेदिन इति द्वे वाक्ये । तत्र

[1] *अस्पष्टमिदं वाक्यजातम्।*

[2] *यद् यदभिन्नाभिन्नमिति व्याप्तिः केवलाभेदस्थले एवेत्यङ्गीकृत्यायं दोषः सुपरिहरः। अन्यथा पृथिवीजलादीनां प्रकृतिकार्यत्वेन प्रकृत्या प्रत्येकं भेदाभेदसत्वेन अनया व्याप्त्या पृथिवीजलादीनामप्यभेदापादने कः परिहारः ?*

द्वितीयवाक्ये द्वित्वादिसंख्याव्यतिरिक्ता इति शेषः कृतः । तेन ज्ञायते द्वित्वादिसंख्या नित्यैव किन्तु नात्यन्ताभिन्नेति । "यावद्वस्तु न भेदवत्" इत्यादिशास्त्रं तु न नियतविषयं किन्त्वौत्सर्गिकमिति।

तदेवमनुपासितमहच्चरणस्य प्रज्ञावादं निराकरणायोग्यमपि क्षुद्रोऽपि शत्रुर्नोपेक्षणीय इति न्यायेन निराकुर्मः।

तत् तथाहि। अस्तु वाक्यद्वयम्। तथापि द्वित्वादिसङ्ख्याव्यतिरिक्ता इति शेषो द्वितीयवाक्यस्यैवेति कथं त्वया निश्चितम् ? द्वितीयवाक्यगतपदव्याख्यानानन्तरं शेषस्य कृतत्वादिति चेन्न । उभयवाक्यस्याप्ययं शेष इति कुतो न निश्चीयते ? यदि प्रतीकग्रहणानन्तरमेव शेषपूरणं कृतं स्यात् त·· प्रथमस्यैवायं शेष इति प्रतीतिःस्यात् । उभयवाक्यस्थपदग्रहणानन्तरं शेषे कृते वाक्यद्वयस्यापि शेष इति प्रतीयते। यदि हि वाक्यभेदज्ञापकं पृथगवतारादिकं स्यात् तदा द्वितीयवाक्यस्थपदव्याख्यानानन्तरं शेषस्य कृतत्वात् तस्यैवायं शेष इति निश्चयः स्यात्। नात्र वाक्यभेदज्ञापकमवतारादिकमस्ति। शक्यते प्रकृते पृथगवतारादिका दातुम्। "तुशब्दोऽवधारणे। ततः किमित्यत आह- **अस्मादिति**। सर्वे इत्यस्यात्रापि सम्बन्धः। अस्मात् कारणादस्माद् भगवतः। द्वित्वादिसङ्ख्याव्यति··ा इति शेषः" इति पृथगवतारयितुं शक्यत्वेऽपि तदकरणं शेषस्य·भयत्राप्यनुवृत्तिसूचनार्थमेव। अन्यथा तद्वाक्यं पृथगवतारितं स्यात् । तस्मादयं द्वितीयवाक्यस्यैव शेष इति निश्चयो न सम्भवति । वस्तुतस्तु प्रथमत एव द्वित्वादिसंख्याव्यतिरिक्ता इति शेषकरणे आगामिनं हेतुं विचिन्त्य तस्य व्यभिचारमालोच्य व्यभिचारपरिहाराय द्वित्वादिसंख्याव्यतिरिक्ता इति शेषः कृत इति प्रतिपत्तिगौरवं स्यात्। हेतूक्त्यनन्तरमेव शेषपूरणे

[1] द्वित्वादिसंख्याव्यति·रि··त्वे सति नित्यत्वरूपहेतोरभावात् न व्यभिचार इत्यर्थः।
[2] तथाच द्वित्वादिसंख्याव्यतिरिक्ता भगवद्धर्मा नैचव भेदिन इत्यङ्गीकारे पूर्वपक्षरीत्या नैव बाधः। पूर्वपक्षी हि द्विदीनां भेदाभेदमङ्गीकरोति।

व्यभिचारपरिहाराय शेषः कृत इति प्रतिपत्तिलाघवमस्तीति तदनन्तरमेव शेषपूरणं कृतम् । तथाह्ययमभिप्रायः सुधायाः । भगवदीयाः सर्वेऽपि धर्मा नित्याः,नित्यत्वाद् भगवताऽत्यन्ताभिन्ना इत्युक्ते द्वित्वादिसंख्यायां व्यभिचारशङ्कायां सत्यां द्वित्वादिसंख्याव्यतिरिक्ता एव धर्मा नित्याः त एव भगवताऽत्यन्ताभिन्ना इत्युक्तम् । एवं च द्वित्वादिसंख्यायां नित्यत्वहेतोरेवाभावान्न व्यभिचार[1] इत्यनुव्याख्यनाभिप्राय इति।

यच्च पूर्वपक्षिणा स्वाभिप्रायानुसारेण सुधाभिसन्धिनिरूपणं तदयुक्तम् । तथाहि। न तावद् द्वित्वादिसंख्यायां बाधवारणार्थ द्वित्वादिसङ्ख्याव्यतिरिक्त इति शेषपूरणं सम्भवति। कृतस्य शेषस्य नैव भेदिन इत्यनेनान्वयो वा धर्मा इत्यनेन वा ? नाद्यः। तथात्वे प्राप्तबाधध्रुवत्वापातात्। द्वित्वादिसंख्याव्यतिरिक्त धर्माणामेव भगवताऽत्यन्ताभिन्नत्वमङ्गीकृत्य हि पूर्वपक्षिणा बाध आपादितः[2]। न द्वितीयः। पश्चात्तनव्याख्यानानन्तरं पूर्वतनपदान्वितशेषकरणमित्यङ्गीकारे तव स्वन्यायविरोधापातः । न च द्वितीयवाक्येऽपि सर्वे तदीया धर्मा इत्यस्यानुवर्तनीयतया न मम स्वन्यायविरोध इति वाच्यम्। तथापि तदीयाः सर्वे धर्मा अस्मान्नैव भेदिनः,अस्मात् कारणात् नित्यत्वादित्यन्वयस्याभिप्रेततया पश्चात्तनव्याख्यानानन्तरं पूर्वपदान्वितशेषकरणे तव स्वन्यायविरोधानिस्तारात् । न चैकस्मिन् वाक्ये पूर्वत्वं पश्चात्तनत्वं च न प्रयोजकं किन्तु वाक्यभेद एवेति वाच्यम् । अर्धजरतीयन्यायापत्तेः । नापि द्वित्वादिसंख्यायां व्यभिचारवारणाय शेषपूरणं सङ्गच्छते। हेतौ व्यभिचारप्राप्तौ पक्षे विशेषणदानस्य पृष्ठताडनाद् दन्तभङ्गवदन्याप्यत्वात्। न हि पर्वतो वह्निमान् प्रमेयत्वादित्यनुमाने ह्रदादावानैकान्त्योद्भावने ह्रदादिभिन्नः पर्वतो वह्निमानिति प्रयोगः सम्भवति । न च द्वित्वादिसंख्याव्यतिरिक्तत्वे सति

[1] द्वित्वादिसंख्याव्यतिरिक्तत्वे सति नित्यत्वरूपहेतोरभावात् न व्यभिचार इत्यर्थः।
[2] तथाच द्वि··ादिसंख्याव्यतिरिक्ता भगवद्धर्मा नैव भेदिन इत्यङ्गीकारे पूर्वपक्षरीत्या नैव बाधः। पूर्वपक्षी हि द्वित्वादीनां भेदाभेदमङ्गीकरोति।

नित्यत्वं हेतुरिति वक्तुं शेषपूरणं कृतमिति वाच्यम् । भावप्रत्ययान्ततया सप्तम्यन्ततया च निर्देशादर्शनात् । न च द्वित्वादिसंख्याव्यतिरिक्ते इत्युक्ते तात्पर्यमर्यादयापि द्वित्वादिसंख्याव्यतिरिक्तत्वं हेतुविशेषणमिति व्युत्पन्नानां प्रतिभाति। न च टीकाकृतां द्वित्वादिसङ्ख्याव्यतिरिक्तत्वादिति शेष इति वक्तुं बुद्धिसामर्थ्यं नास्ति । तस्मात् परोक्ततात्पर्यस्यानुपपत्तेरस्मदुक्तमेव तात्पर्यमिति सिद्धम्।

अपि च वाक्यार्थो हि प्रमाणान्तराविरूद्ध एव कर्तव्यः । अयं च त्वदीयबुद्धिकल्पितो वाक्यार्थः "खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत्" इति प्रमाणविरुद्धः[1] । द्वित्वादिसङ्ख्याया नित्यत्वमङ्गीकृत्यात्यन्ताभिन्नत्वानङ्गीकारे यावद्वस्तु न भेदवदिति निषिद्धाङ्गीकारस्य स्फुटत्वात्। न च तस्यापि प्रमाणस्यानेन प्रमाणेनापवाद इति वाच्यम् । प्राबल्यकारणस्याभावात् । न चानुव्याख्यानवाक्यं द्वित्वदिसङ्ख्यामात्रविषयत्वात् प्रबलं तत्वविवेकवाक्यं तुसामान्यविषयत्वाद् दुर्बलमिति वाच्यम् । भवति भवतोऽयंमनोरथः स एव कपोणिगुडायित इत्युक्तत्वात् । किञ्चानेनैव प्रमाणेन विरुद्धत्वात् तत्व विवेकवाक्यविषयसङ्कोचे निर्णीयते प्रमाणान्तरेण वा ? नाद्यः । तत्वविवेक वाक्यस्यविषयसङ्कोचो सिद्धे तद्विरोधाभावेनानुव्याख्यानवक्यस्य स्वाभिमतार्थत्वसिद्धिस्तस्यां च सत्यां तत्वविवेकवाक्यस्य विषयसङ्कोच इत्यन्योन्याश्रय प्रसङ्गात्। न द्वितीयः। तादृशप्रमाणादर्शनात्।

अथास्त्येव प्रमाणान्तरविरोधः। सुधायामेव वैशेषिकपरीक्षायां येषु परस्परं भेदे सत्यपि विभागो न कदापि भावी स परमाणुरिति परमाण्वंशानां परस्परमखण्डितत्वेऽपि भेदोऽस्तीत्युक्तम्। तेन ज्ञायते यावद्वस्तु न भेदवदिति शास्त्रमौत्सर्गिकविषयमिति। किञ्च सुवर्णपीतद्रव्यस्य यावद्वस्तुत्वेऽपि सुवर्णाद्

1 *'खण्डिते भेद एक्यं च ..' इति वाक्यं सामान्यविषयम्। 'न केनचिदभेदोऽस्ति भेदाभेदोऽपि वा क्वचित् । समुदायमृते विष्णोः स्वगुणादीन् विनापि वा' इति विशेषविषयम् । अतः पूर्वपक्षिणा सामान्यशास्त्रस्य विशेषशास्त्रविषयातिरिक्तविषयत्वेन सङ्कोचः क्रियते।*

भेदोऽस्त्येव। अपि च कालाकाशायोः परस्परमखण्डितसन्निकर्षे सत्यपि भेदः सर्वेषामपि सम्मत एव। तथा लक्ष्मीलक्ष्मीरमणयोः सन्निकर्षस्य यावद्वस्तुत्वेऽपि भेदोङ्गीक्रियते । एवमाद्यनेकप्रमाणविरुद्धत्वात् तत्वविवेकवाक्यविषयसङ्कोचो न्याय्य एवेति चेन्न। भ्रान्तोऽसि। यतस्तत्वविवेके पूर्वापरपरामर्शशून्योऽसि। तत्र हि

"कार्यकारणयोश्चैव तथैव गुणतद्वतोः ।
क्रियाक्रियावतोस्तद्वत् तथा जातिविशेषयोः ।।
विशिष्टशुद्धयोश्चैव तथैवांशांशिनोरपि"

इत्युत्तरवाक्येन "खण्डिते भेद ऐक्यं च यावद्वस्तु न भेदवत्" इति वाक्यं व्यवस्थापितम्। व्याख्यातं च टीकायां कार्यमुपादेयं कारणमुपादानमित्यादिना। एवं च परमाण्वंशानां परस्परं कार्यकारणभावादिरहितानां भेदेऽपि [1]का क्षतिः? सुवर्णऽतिरिक्तं पीतद्रव्यं नाङ्गीकृतमेव । अङ्गीकारेऽपि वा अंशाशिभावापन्नत्वाभावान्न हानिः। एवं कालाकाशादावपि नाभेदप्रसक्तिः। ननु तथापि खण्डिते भेद ऐक्यं चेति पूर्वभागस्तावदौत्सर्गिक एव । अन्यथा एतद्घटविशिष्टपरमात्मनो विशेषणेन भेदाभेदप्रसङ्गात्[2] । एतद्घटनाशे सति एतद्घटविशिष्टस्यापि नाशेन तस्य खण्डितत्वात् । एवं परमात्मनः क्वापि भेदाभेदानङ्गीकारिणस्तव तत्र भेदाभेदानुपपत्या अत्यन्ताभेदस्यैवाङ्गीकार्यत्वेन खण्डिते भेद ऐक्यं चेति शास्त्रमौत्सर्गिकविषयमेवेति वाच्यम्। तत्समानन्यायेन यावद्वस्तु न भेदवदिति शास्त्रमप्यौत्सर्गिकमेवेति चेत्। न।

1 *परमाण्वंशानामंशिना परमाणुना कदाप्यविभागेनाभेदसत्वात्' यद्यदभिन्नाभिन्नमिति न्यायेन परस्परं परमाण्वंशानामप्यभेदात् कथं तेषु भेदः सूपपादः?*
2 *नेदमापादनं युक्तम् । विशेषणस्य विशिष्टं प्रति निमित्तत्वेन भेदस्यैवाङ्गीकारात् । विशेष्यस्य तूपादानतया भेदाभेदाङ्गीकारेणापादनस्यानिष्टत्वाभावात्। अतः परमात्मनः क्वापि भेदाभेदानङ्गीकारे एतद्घटविशिष्टपरमात्मनो विशेष्येण परमात्मना भेदाभेदो न स्यादित्येव सरलमापादनं सुशकम् । उत्तरवाक्यपरिशीलने 'विशेष्येण परमात्मना अत्यन्ताभेदप्रसङ्गात्' इति वक्तव्यमासीत्। यथास्थितपाठस्तु लेखकदोषमूलो भाति।*

अत्र केचिदाहुः। एतद्घटविशिष्टस्य विशेष्येण परमात्मना भेदाभेद एव। तस्य विशेष्ये परमात्मनि खण्डितत्वात्। विशेष्यस्य तु तेनात्यन्ताभेद एव[1]। खण्डिते भेद ऐक्यं चेति शास्त्रस्य खण्डिताधिकरणकविषयत्वेनाखण्डिते शुद्धे भेदाभेदाप्रापकत्वात्। न चैवं मृत्पिण्डस्यापि घटेनात्यन्ताभेदापत्तिः। इष्टापत्तेः। घटस्यैव मृत्पिण्डेन भेदाभेदौ। नच मृत्पिण्डस्य घटेनात्यन्ताभेदे घटस्यापि मृत्पिण्डेनात्यन्ताभेदो वा घटस्य मृत्पिण्डेन भेदाभेदे मृत्पिण्डस्यापि घटेन भेदाभेदो वा स्यादिति वाच्यम्। नियामकाभावात्। प्रमाणाभावादिति।

तदनुपपन्नम्। तथासति द्वित्वस्यायावद्रव्यभावित्वेन भगवता सह भिन्नाभिन्नत्वेऽपि भगवतस्तेनात्यन्ताभिन्नत्वसम्भवात्। "समुदायमृते विष्णोरिति समुदायेन विष्णोर्भेदाभेद इत्यादि सुधानुपपत्तेस्तद्विरोधाच्च।[2] किञ्च घटविशिष्टं जगत्प्रविष्टं वा ब्रह्मैव वा ? नाद्यः। ब्रह्मजगतोरत्यन्ताभेदापत्तेः। न द्वितीयः। ब्रह्मण्येव भेदाभेदाङ्गीकारे"भेदाभेदप्रदर्शी तु मध्यमं तु तमो व्रजेत्" इति बृहद्भाष्यविरोधात्। तस्मान्नायं पक्षः।

वयं तु ब्रूमः। सर्वपटदण्डादिविशिष्टो नाम तत्सम्बन्धविशिष्ट एव। न तु तद्विशिष्टस्तत्सम्बन्धविशिष्ट इति पदार्थद्वयं कल्प्यम्। गौरवात्। यथाहुः "कल्पनागौरवाद् दोषात् पदार्थान्तरता न हि " इति। दण्डीत्यत्र दण्डसम्बन्धस्यापि प्रतीतेः। न च दण्डीत्यत्र दण्डसम्बन्धः संसर्गमर्यादयैव भासते न तु विशेषणतयेति कथं तस्य विशेषणत्वमिति वाच्यम्। न हि प्रतीतिसमयमात्रपरिवर्ती विशिष्टो नाम पदार्थः। किन्तु यावत्कालं विशेषणादिकमस्ति तावत्कालमनुवर्तमानः। एवं च दण्डीति प्रतीतिसमयेऽपि दण्डसम्बन्धविशिष्टस्य विद्यमानत्वात् तस्यैव दण्डीति प्रतीतिविषयत्वोपपत्तौ पदार्थद्वयकल्पने गौरवात् तदानीं दण्डसम्बन्धस्य विशेषणत्वाभावेऽपि का हानिः?[3] यद्वा दण्डसम्बन्धविशिष्ट एव सर्वत्रापि प्रतीयते क्वचिद् व्यवहारस्तु

[1]नेदं समाधानमपि स्वरसम्। मन्दारमञ्जर्यादौ विशेष्यविशिष्टयोः भेदाभेदस्यैव सविस्तरं समर्थनात्। अत्रैव पूर्ववाक्ये तथोक्तेश्च। [2]किञ्चेत्यादि वाक्यसमूहाभिप्रायो न व्यक्तः। [3]दण्डस्य विशेषणत्वाऽभावेपि का हानिरिति पाठः स्यात्।

दण्डीत्येवमाकारकोऽस्तु। सिंहसदृशो देवदत्त इति क्वापि सिंहो देवदत्त इत्येव व्यवहारः। एवं चैतद्घटनाशेऽपि एतद्घटसंयोगस्येश्वरधर्मस्य कदापि नाशाभावेन विशेषणविशेष्ययोरन्यतरनाशाभावेन विशिष्टस्यापि नित्यत्वाद् विशिष्टशुद्धयोः खण्डितत्वाभावान्न भेदाभेदः किन्त्वत्यन्ताभेद एवेति न कोपि क्षुद्रोपद्रवः [1]।

अथवाऽन्यत्र यथातथाऽस्तु। भगवति तत्सम्बन्धविशिष्ट एव नतु तद्विशिष्टोऽपि। तद्विशिष्टस्य कल्पने प्रमाणविरोधस्य भेदाभेदादिदोषस्यापि प्रसङ्गात्। भगवति दोषत्वेन प्रतीयमानानां गुणत्वेन नेतव्यत्वात्। यथोक्तम्-"ये दोषा इतरत्रापि ते गुणाः परमे मताः। न दोषः परमे कश्चिद् गुणा एव निरन्तराः" इत्यादेः। तस्मात् खण्डिते भेद ऐक्यं चेति शास्त्रमपि नियतविषयमेवेति सिद्धम्।

एवं चेश्वरद्वित्वस्य नित्यत्वं न सुधाभिप्रेतमिति(स्वीकृत्य) अनित्यं तदित्यङ्गीकारे भगवत एवोपादानत्वादिप्रसङ्गेन महान् दोषो भवति।

यद् द्वित्वस्यानित्यत्वेऽप्यनुपादानत्वोपपत्तेर्न दोष इति कैश्चिदुक्तं तदपि न। अनुपादानसृष्टेः सिद्धान्तेऽनङ्गीकारात्। द्रौपदीवस्त्रादीनामपि सोपादानत्वात्। अत एवाहुः न हि निरुपादाना सृष्टिरिति। यत्तु भगवत एवोपादानत्वाङ्गीकारेऽप्यवयवशैथिल्याभावान्न दोष इति। तदपि न युक्तम्। यथा दर्पणस्यावयवशैथिल्याद्यभावेऽपि अनेकप्रतिबिम्बात्मना परिणामः, प्रतिबिम्बात्मनोत्पत्तिस्तदात्मना विनाशः, प्रतिबिम्बेन सह भेदाभेदादभेदप्रयुक्तदोषान्तरापत्तिरित्याद्यतिप्रसङ्गः तथा भगवतोऽप्युत्पत्तिविनाशादिदोषापत्तेः[2] कथमपि परिणामोऽङ्गीकर्तुं न शक्यः। अन्यथा दर्पणादपीश्वरावयवस्यातिस्वच्छत्वात् तत्र जगत्प्रतिबिम्बरूपपरिणामाङ्गीकारप्रसङ्गात्। नचास्य परिणामस्य प्रतिषेधकं किञ्चिद् भगवत्पादवाक्यमस्ति न वा[3]। परिणामः

[1] कथं तर्हि मन्दारमञ्जरी नेया? [2] द्वित्वस्यानित्यत्वं स्वीकृत्य भगवता भेदाभेदेऽङ्गीकृते द्वित्वोत्पत्तिनाशाभ्यां भगवतोऽप्युत्पत्तिनाशौ प्रसज्येते इत्युच्यते। तथा सति मृद्घटयोर्भेदाभेदाङ्गीकारात् कथं घटस्योत्पत्तिनाशाभ्यां मृदुत्पत्तिनाशप्रसङ्गपरिहारः?। [3]अस्पष्टमिदम्। न च तादृशस्य परिणामस्य प्रतिपादकं किञ्चिद् भगवत्पादीयवाक्यमस्तीति स्वरसम्। इतः परं वाक्यद्वयमस्पष्टम्।

परिणामत्वेनैव दोषः अथवा निर्विकारोऽक्षरः शुद्ध इति सामान्यवचनमस्तीत्येव वा ? दर्पणादिष्वप्यस्मदप्रत्यक्षं यत्किञ्चिदवयवशैथिल्यमस्तीति वा अङ्गीकृत्य तादृशपरिणामः परिह्रियते तर्हि द्वित्वद्यात्मनाऽपि परिणामस्त्याज्य एव। अनुव्याख्यानसुधयोरन्यार्थत्वस्य वक्ष्यमाणत्वात्।

किञ्चानित्येन द्वित्वेनेश्वरस्य भेदाभेदाङ्गीकारे तद्गतोत्पत्तिविनाशादिदोषाः प्राप्यन्ते । न च भेदस्य विद्यमानत्वाद् दोषाणामवकाशो नास्तीति वाच्यम् । तथाप्यभेदेन दोषाणामापत्तेः । यथोक्तं भास्करं भेदाभेदवादिनं प्रत्याचार्यैः भेदाभेदेऽप्यभेदेन दोषाणामपि सम्भव इति । न चेश्वरः स्वसामर्थ्येन दोषान् निवारयतीति वाच्यम्। दोषिणः सामर्थ्यस्यैवानुपपत्तेः।

किञ्च परमेश्वररूपयोर्द्वित्वं भिन्नाभिन्नमत्यन्ताभिन्नं वा ? नाद्यः । निर्भेदे भेदाङ्गीकारस्यायुक्तत्वात् [1]। न द्वितीयः। द्वित्वादिसंख्याव्यतिरिक्ता इति शेष इति सुधाविरोधापत्तेः[2]। तस्मादेवमाद्यनेकदूषणापत्ते द्वित्वं परमात्मनि नित्य मत्यन्ताभिन्नं चेत्यङ्गीकर्तव्यम्।

ननु तर्हि द्वित्वादिसङ्ख्यव्यतिरिक्ता इति शेष इति सुधायाः कोऽर्थ इति चेन्न। किमेवं प्रत्यर्थी भूत्वा पृच्छसि शिष्यो भूत्वा वा ? नाद्यः । तथात्वे हि अस्मदुक्तदूषणानि परिहृत्य त्वमेव सुधावाक्यार्थं ब्रूहि । अनाविष्कुर्वन्नन्वयादितिशास्त्रार्थमनुसन्दधानैरस्माभिः कथमयोग्योपदेशः कर्तुं शक्यते ?

अथ "नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत। स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव" इति मम तत्वज्ञानयोग्यताऽस्त्येव, अत आर्यैस्तत्वोपदेशः कर्तुं शक्य एवेति मन्यसे तथापि बहुशो दुष्टचित्ततयाऽवगतस्य तव कपटवाक्यं न

---

1 ये परमेश्वररूपयोर्द्वित्वं भिन्नाभिन्नमित्यभिप्रयन्ति ते निर्भेदश्रुतेरेतद्व्यतिरिक्तस्थल एवावकाशं कल्पयन्तीति नानुपपत्तिः। 2 ईश्वररूपद्वित्वस्य बाधकाभावेन नित्यत्वे तत एवात्यन्ताभेदेऽङ्गीकृतेऽपि , शेषपूरणमिदं घटेश्वरद्वित्वस्येश्वरेणाभेदवारणायेति तेषामाशयः। न च वैरूप्यं दोषः प्रमाणायत्तत्वात् तस्येति।

विश्वसिमः। तथापि तुष्यतु दुर्जन इति न्यायेन सम्प्रदायो विलिख्यते। तथा हि। **द्वित्वादिसंख्याव्यतिरिक्ता इति शेष इति वाक्यं प्रक्षिप्तमिति स्वयूथ्याः केचिद् वदन्ति** । द्वित्वादिसंख्याव्यतिरिक्ता इतिशेषवाक्यार्थः अन्तर्भावितद्वित्वादिसंख्या इति यावत् । न च शेषपूरणं व्यर्थम् । घटादौ घटत्वादीनां यावद्द्रव्यभाविनामत्यन्ताभेदे सत्वेऽपि द्वित्वादिसंख्यानां भिन्नाभिन्नत्वायावद्द्रव्यभावित्वस्य दर्शनेन घटत्वादिवैलक्षण्योपपादनार्थमन्तर्भावितद्वित्वादिसंख्याः सर्वे अपि भगवद्धर्मा नित्या भेदिनश्च नैवेति वक्तव्यत्वेन सार्थकत्वादित्यपरे वदन्ति [1]।

द्विविधं खलु--[2]--द्वित्वादिकं स्वयमेव --[3]--स्वसमानद्वित्वाद्यन्तरसहायं चेति । तत्र स्वयमेवेति यदेकधर्म्याश्रितमेकमेव द्वित्वं तदप्रत्यक्षम्[4] । यच्च स्वसमानधर्मान्तरसहायं तदेव द्वावित्यादिप्रत्यक्षव्यवहारयोर्विषयः । तत्र प्रत्यक्षादिविषयस्य द्वित्वस्य धर्मिणा नात्यन्ताभेदःकिन्तु स्वकीयद्वित्वेनाभेदः अन्यदीयद्वित्वेन भेद इति भेदाभेदावेव । एकस्यैव सहायसहितस्य प्रत्यक्षत्वं तद्रहितस्य चाप्रत्यक्षत्वं च केशस्येव युज्यते । सुधावाक्यं सर्वमपिससहायद्वित्वविषयम्[5]। न च स्वभिन्नेन भेदस्य स्वतःसिद्धत्वात् स न वक्तव्य एवेति वाच्यम् । "अभिन्नो भगवान् स्वेन तदन्येन विभेदवान्" इत्यनुव्याख्याने--[6]---तथैवोक्तत्वात् । यद्यपि घटेश्वराश्रितं द्वित्वद्वयं नास्मत्प्रत्यक्षं ज्ञानिनां त्वसहायमपि प्रत्यक्षमेव तथाप्यवतारेऽज्ञजनप्रत्यक्षतायां यद् द्वित्वं तदपेक्ष्यैतदुक्तमित्यपरे मन्यन्ते[7]।

---

1 अन्तर्भावितद्वित्वमिति शब्दस्याभिप्रायो न ज्ञायते। ग्रन्थकर्त्रा शेषवाक्यस्य स्वाभिप्राये वर्णनीये घटादिगतद्वित्वस्यानित्यत्वं भेदाभेदं च येऽभ्युपगच्छन्ति तेषामभिप्रायानुवादः स्वविरोधितया प्रकृतानुपयुक्तः।

2,3,6 अत्र कोशे पातो निर्दिष्टः।

4 अप्रत्यक्षद्वित्वांगीकारे किं प्रमाणम्? अनङ्गीकारे किं बाधकम्?

5 नेदं युक्तम्। तथा सति सा चायावद्द्रव्यभाविनी भिन्नाभिन्नेति सुधाविरोधात्। एतत्कल्पे हि भेद एव वक्तव्यः।

7 तथाच वैरूप्यकल्पनमेतत्पक्षेऽपि समानम्।

[1] वस्तुतस्तु सुधाया भावो दुर्बोधः । यस्त्वस्मदीयाशङ्कां परिहृत्य सुधाया अपि भावं सहृदयहृदयानन्दं वर्णयेत् स एव नास्ति । अस्ति चेत्तस्य वयं शिष्याः स्यामेति मन्यन्ते अन्ये---[2]---

अथ समुदायस्तु भिन्नग इति श्लोकार्थो निरूप्यते । समुदायोऽनेकत्वसंख्या । भिन्नगः भिन्नेष्वेव ज्ञानविषयः । नत्वैकत्वादिकमिवैककस्मिन्नेव प्रत्यक्षविषय इति ।

अथ "न केनचिदभेदोऽस्य भेदाभेदोऽपि वा क्वचित् । समुदायमृते विष्णोः स्वगुणादीन् विनापि वा" इत्यस्य तु विष्णोः स्वगुणादिभिरभेदः,समुदायेन तु भेदाभेदः, ईशानीशसमुदायेन भेदाभेदः,ईशसमुदायेनाभेदः, अनीशसमुदायेन तु भेद इति[3] । समुदायोऽनेकत्वसंख्येति विवक्षायामपि स्ववृत्त्यन्यवृत्ति-समुदायाभ्यां भिन्नाभिन्नो भगवानिति "अभिन्नो भगवान् स्वेन तदन्येन विभेदवान्" इत्युक्तः ।

द्वित्वेन सह भगवतो भेदाभेदो न संभवतीत्यत्र प्रमाणं तु तद् द्वित्वं जडं वा चेतनं वा ? नाद्यः । जडाजडयोरैक्यानुपपत्तेः । न द्वितीयः । चेतनत्वेऽनित्यत्वानुपपत्तेः । नित्यत्वेऽपि नित्यमुक्तत्वानुपपत्त्या नित्यमुक्तत्वासम्भवे नेदानीं पूर्वं बद्धत्वे तदभिन्नस्य वि--[4]-ष्णा-[5]--नित्यमुक्तत्वानुपपत्तेः । सर्वदा बद्धत्वे चोक्तदोषस्य सर्वात्मनाऽऽपत्तेः । रमाद्यन्यतमस्य तादृशचेतनस्यादर्शनाच्च। जडाजडावैलक्षण्ये प्रत्यक्षमायावादिमतप्रवेशापत्तेरिति युक्तिस्तावदत्र प्रमाणम् [6]।

---

[1] *अयमन्यापदेशेनोक्तो ग्रन्थकर्तुः स्वाभिप्रायो वा नवेति न स्पष्टम् । प्रायः स्वाभिप्रायः स्यात् वस्तुतस्त्विति प्रारम्भात्अन्तिमत्वाच्च ।*[2,4,5] *अत्र कोषे पातो निर्दिष्टः ।*

[3]*समुदायेन भेदाभेद इत्यस्यैव विवरणमुत्तरो वाक्यशेषः । तत्र ईशानीशसमुदायेन भेदाभेद इति तु ग्रन्थकर्तुः स्वाभ्युपगम विरुद्धः । न च घटेश्वरद्वित्वस्यासहायस्येश्वरे विद्यमानस्य तेनाभेदः घटगतद्वित्वसहायस्य तस्य तेन भेद इत्यभिप्राय इति वाच्यम् । घटगतद्वित्वस्याप्येतादृशव्यवस्थाङ्गीकारेण विशिष्येश्वरद्वित्वव्यवस्थाप्रकारस्याव-क्तव्यत्वात् ।*

[6]*अस्पष्टमिदं युक्तिविवरणम् ।*

अतोऽनन्तगुणं ब्रह्म निर्भेदमपि भण्यते ।
एवं धर्मानिति श्रुत्या तदभेदोऽप्युदीर्यते ।।

पञ्च भेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च ।
निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्नचान्यथा ।।

विष्णोश्च तद्गुणानां च भेददर्श्यधरं तमः ।
भेदाभेदप्रदर्शी च मध्यमं तु तमो व्रजेत् ।।

जीवाभेदो निर्गुणत्वमपूर्णगुणता तथा ।
साम्याधिक्ये तदन्येषां भेदस्तद्गत एव च ।।

प्रादुर्भावविपर्यासस्तद्भक्तद्वेष एव च ।
तत्प्रमाणस्य निन्दा च द्वेषा एतेऽखिला मताः ।।

नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः ।
न केनचिदभिन्नोऽतो भगवान् स्वगुणैर्विना ।।

न चोर्णनाभिजनितृमातॄणां च विकारिता ।
चेतनत्वात् तदन्नं हि कार्यरूपतया भवेत् ।।

त्यादिप्रमाणानि परःसहस्राणि सन्ति ।

यद्यप्यत्र केषुचिद् वाक्येषु विचारः कर्तव्योऽस्ति । तथापि विस्तरभयादुपरम्यते ।

इत्थं गोपालकृष्णेन मीमांसा द्वित्वगोचरा ।
रचिता प्रीतये भूयाच्छ्रीमध्वमतवर्तिनाम् ॥

श्रीमध्वदेशिकजयार्यनृसिंहपाद-
पादाम्बुजस्मरणपुण्यविशेषजातम् ।
एनं दुराग्रहकचग्रहमाहुरार्याः
केचिद् दुरुक्तिमुखताडनमाहुरेनम् ॥

॥ इति श्रीगोपालकृष्णाचार्य विरचिता द्वित्वमीमांसा समाप्ता ॥

॥ श्रीरस्तु ॥